श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-३०

# नाट्यसप्तर्षिकम्

(२०२३ वर्षे समायोजितायां राष्ट्रिय-संस्कृत-एकाङ्किरचना-स्पर्धायां प्राप्त-एकाङ्किनाट्यानां सङ्ग्रहः)

**प्रधानसम्पादकः**

**प्रो. (डॉ.) ललितकुमारः पटेलः**

प्र. कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**सम्पादकः**

**डॉ. जिगरः म. भट्टः**

सहायकाचार्यः (साहित्यम्)

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A+ श्रेण्या प्रत्यायितः)

श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-३०

# नाट्यसप्तर्षिकम्

**(२०२३ वर्षे समायोजितायां राष्ट्रिय-संस्कृत-एकाङ्किरचना-स्पर्धायां प्राप्त-एकाङ्किनाट्यानां सङ्ग्रहः)**

**प्रधानसम्पादकः**

**प्रो. (डॉ.) ललितकुमारः पटेलः**

प्र.कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**सम्पादकः**

**डॉ. जिगरः म. भट्टः**

सहायकाचार्यः (साहित्यम्)

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा अ+ श्रेण्या प्रत्यायितः)

**प्रकाशकः –**

**डॉ. दशरथजादवः**

कुलसचिवः,

श्रीसोमनाथसंस्कृतयुनिवर्सिटी,

राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६

गीर-सोमनाथजनपदम्, गुजरातम्

दूरभाषः – ०२८७६-२४४५३२, फेक्स – २४४४१७

www.sssu.ac.in

**सहसम्पादकः समन्वयकश्च –**

**डॉ. कार्तिकः पण्ड्या**

संशोधनाधिकारी,

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

*© Shree Somnath Sanskrit University, Veraval-2023*

All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without the written permission from the publisher.

| | |
|---|---|
| संस्करणम् | : प्रथमम् |
| वर्षम् | : जुलाई-२०२३ |
| प्रतिकृतयः | : ५००/- |
| ISBN | : ९७८-९३-८३०९७-६०-९ |
| मूल्यम् | : रु. १६०/- |
| मुद्रकः | : झेनिथ ग्राफिक्स, व्रज-प्लाझा, जैनदेरासरमार्गः,<br>वेरावलम्-३६२२६६, जि. गीर-सोमनाथः, गुजरातम् |

Shree Somnath Sanskrit University Grantha Series-30

# NĀṬYASAPTARṢIKAM

**(Proceeding Volume of National Sanskrit Playlets Competition Organised in the Year 2023)**

**Chief Editor**

**Prof. (Dr.) Lalitkumar Patel**

Vice Chancllor (I/c.),

Shree Somnath Sanskrit University, Veraval

**Editor**

**Dr. Jigar M. Bhatt**

Assistant Professor (Sāhityam)

Shree Somnath Sanskrit University, Veraval

**Shree Somnath Sanskrit University, Veraval**

**(Accredited by NAAC with A+ Grade)**

**Published by –**

**Dr. Dasharath Jadav**
Registrar,
Shree Somnath Sanskrit University,
RajendraBhuvan Road, Veraval – 362 266
Dist. Gir-Somnath, Gujarat
Phone – 02876-244532, Fax – 244417
www.sssu.ac.in

**Assistant Editor & Co-ordinator –**

**Dr. Kartik Pandya**
Research Officer,
Shree Somnath Sanskrit University, Veraval

*© Shree Somnath Sanskrit University, Veraval-2023*

All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without the written permission from the publisher.

| | | |
|---|---|---|
| Edition | : | First |
| Year | : | July-2023 |
| Copies | : | 500 |
| ISBN | : | 978-93-83097-60-9 |
| Price | : | Rs. 160/- |
| Printed By | : | Zenith Graphic, Vraj Plaza, Jain Derasar Road, Veraval-362266, Dist. Gir Somnath, Gujarat (India) |

# शुभाशंसनम्

आचार्यः भरतमुनिः नाट्यशास्त्रे कथयति यत् –

**दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्।**
**विश्रान्तिजननं लोके नाट्यमेतद् भविष्यति ॥**

एतत् नाट्यं कालेन सह परिवर्तनम् आप्नोति अत एव आधुनिके काले के विषयाः नाट्ये सन्दर्भणीयाः वर्णनीयाः वा? इति विचारिते सति अनेके विषयाः, अनेकाः समस्याश्च अस्माकं मानसे अहमहमिकया आगच्छन्ति। एतदेव विचार्य विश्वविद्यालयेन राष्ट्रिया संस्कृत-एकाङ्किचरना-स्पर्धा आयोजिता आसीत्। अस्यां स्पर्धायां सप्त एकाङ्कीनि नाट्यानि रूपकाणि प्राप्तानि, येषां मूल्याङ्कनं समीक्षा च विद्वद्भिः अक्रियत। अधुना ग्रन्थरूपेण तानि रूपकाणि भावकानां करकमलयोः समर्प्यन्ते इति हर्षस्य विषयः।

भगवान् सोमनाथः कलानाथः वर्तते। नाट्यम् अभिनयः संवादश्च काचित् कला एव, अत एव नाट्यशास्त्रस्य आरम्भे ब्रह्मणा सह महेश्वरस्य अपि प्रणामः क्रियते। मन्ये सोमनाथकृपाप्रसादेन एतेषां रूपकाणाम् आविर्भावोऽजायत। सप्तर्षयः भगवन्तं सर्वदा स्तुवन्ति, तस्मात् एतस्य ग्रन्थरत्नस्य शीर्षकम् **"नाट्यसप्तर्षिकम्"** विचारितं वर्तते। अयं ग्रन्थः विदुषां सहृदयानां भावकानां पिपठिषूणां रसानुभूतये भवतु इत्येव कामना।

प्रो. (डॉ.) ललितकुमारः पटेलः
प्र.कुलपतिः

# सम्पादकीयम्

**"नाटकान्तं कवित्वम्"** इति काचित् प्रसिद्धा उक्तिः। एतस्मिन् सङ्ग्रहे एकाङ्किनां प्रकाशनं जायते, तेषाम् एकाङ्किनां रचयितारः कवित्वं प्रति कृतपादविन्यासा वर्तन्ते। अद्य एकाङ्कि निर्मितं, भविष्यति सम्पूर्णस्य नाटकस्य रचनापि सम्भाव्यते। अस्मिन् सङ्ग्रहे नारीणां मनोबलविषये, गृहिणीनां कर्मदक्षताविषये, गृहस्य भारविषये, क्रम-व्युत्क्रमसंवादविषये, शौर्यविषये, सरस्वत्यास्तत्त्वविषये च प्रतिभागिभिः रचितानि एकाङ्कीनि प्रकाशितानि सन्ति।

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०२३ तमे वर्षे राष्ट्रस्तरीया एषा स्पर्धा आयोजिता आसीत्। स्पर्धायाः संयोजकत्त्वेन कार्यं कर्तुं सौभाग्यं तु प्राप्तमेव, अस्य सङ्ग्रहस्य सम्पादनाय अपि सौभाग्यं प्राप्तम्। इतः पूर्वं **"स्वतन्त्रतासमर्चनम्"** इति ग्रन्थेन स्वतन्त्रतायाः स्तुतिः काव्यरूपेण विहिता। अनेन **"नाट्यसप्तर्षिकम्"** ग्रन्थेन नाट्यात्मकस्य परमात्मनः समर्चना क्रियते। उक्तं च –

**काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च।**
**शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः॥**

अनेन न्यायेन, **"शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः"** इति च न्यायेन अयं ग्रन्थः हरिहरात्मकस्य परमात्मनः प्रीतये भूयादिति आशासे।

**सम्पादकः**
डॉ. जिगरः म. भट्टः
सहायकाचार्यः (साहित्यम्)

# विषयानुक्रमणिका


| क्रमः | शीर्षकम् | कर्ता | पत्राङ्कः |
|---|---|---|---|
| १ | धीरनारीमनोबलीयम् | श्री सूर्य हेब्बारः | ०१ |
| २ | करुणा | डॉ. जिगरः म. भट्टः | १३ |
| ३ | गृहभारम् | श्री ऋषभः देरासरी | २६ |
| ४ | व्युत्क्रमम् | डॉ. अमृतलालः भोगायता | ३३ |
| ५ | दीपोत्सर्गः | डॉ. शैलेष कुमारः मिश्रः | ४२ |
| ६ | शम्भुराजशौर्यम् | श्री प्रकाशः जानी | ५३ |
| ७ | सरस्वतीरहस्यम् | श्री रुद्रः जयन्तभाई भट्टः | ५९ |

# ॥ धीरनारीमनोबलीयम् ॥[1]

**श्री सूर्य हेब्बारः**[2]

## पात्राणि

| | | |
|---|---|---|
| १ | **सूत्रधारः** | |
| २ | **नटी** | |
| ३ | **सुनन्दा-** | राष्ट्रभक्ता महिला |
| ४ | **सुदती-** | सुनन्दायाःप्रतिवेशिनी |
| ५ | **सुधीरः-** | आरक्षकः, सुनन्दापतिः |
| ६ | **श्रीधरः-** | सुधीरस्य मित्रम् |
| ७ | **भास्करः-** | सुधीरस्य मित्रम् |
| ८ | **नानासाहेबः-** | स्वातन्त्र्यवीरः |

**सूत्रधारः**

**येनोत्थापितखड्गकुन्तविशिखा रक्षांसि चूर्णीकृता**
**दुष्टेऽभ्योऽद्य ददातु सन्धृतगदः रक्षां हनूमान्बली।**
**कुल्यातुल्यमतुल्यलङ्घनविधेर्वार्यस्य वारान्निधेः**
**कार्पासीकृतसर्वपर्वतकुलः कष्टाद्रिहन्तास्तु वः ॥१ ॥**

आर्ये... इतस्तावत्। (कर्णं दत्त्वा) किं नु खलु आहूतापि मौनमातिष्ठते (नेपथ्ये देवपूजाघण्टारवः) सकृत्समापितपूजा मे भार्या। पुनः कोऽयं देवपूजाघण्टारवः। (विचिन्त्य) भवतु, पश्यामि तावत् (अवलोक्य) अये इयं खलु मे प्रीया नीराजनहस्ता इत एवाभिवर्धते।

**नटी** (प्रविश्य) आर्य गृह्यतां नीराजनम्। प्रार्थ्यतां महापुरुषाशीः।

---

१ राष्ट्रिय-संस्कृत-एकाङ्किरचनास्पर्धायां प्रथमपुरस्कारेण सभाजितं रूपकम्

२ सहसम्पादकः, सम्भाषणसन्देशः, संस्कृतभारती

**सूत्रधारः** आर्ये पूर्वमेव सकृत्समापितपूजासि। गृहीतं च मया नीराजनम्। कुतोऽद्य ते पुनरपि पूजायां प्रवृत्तिः।

**नटी** करणीयं विस्मृतं मन्ये आर्यपुत्रेण। अद्य खलु स्वातन्त्र्यसङ्ग्रामस्यामृतमहोत्सवमुपलक्ष्य देशभक्तिसम्बद्धं धीरनारीमनोबलीयं नाम रूपकं प्रस्तोतव्यमित्यादिष्टं सोमनाथसंस्कृतविश्वविद्यालयेन।

**सूत्रधारः** आर्ये! नूनं स्मरामीदम्। अत एव खलु नाट्योपकरणसन्नाहे दत्तमनाः नटागमनं प्रतीक्षमाणः दग्धपुच्छो मार्जाल इव इतस्ततो भ्रमामि।

**नटी** मयाप्यद्य तदङ्गतया वीरपुरुषाणां विशेषपूजा समनुष्ठिता। तत्प्रसादोऽयं गृह्यताम्।

**सूत्रधारः** युक्तमाचरितं तत्रभवत्या। पूजनीयाः खलु वीरयोधाः। यतो हि-

**रक्तां त्यक्त्वा कान्तां रक्तं दत्तं स्वमातृभूम्यै यैः।**
**भारतभूमिसुपुत्रैः तेभ्यो भूयः प्रणामाः स्युः ॥२॥**

**नटी** आर्य! प्रणतास्ते मुहुर्मुहुः। येषां कारणेनाधुना वीतचिन्ताः स्मः।

(नेपथ्ये रोदनध्वनिः)

**सूत्रधारः** सद्यो विवाहिता देशभक्ता सुनन्दा देशस्य दुःस्थितिं चिन्तयन्ती रोदितीति भावये। (अवलोक्य)। श्रुत्वा च तद्रोदनं प्रतिवेशिनी सुदती तद्गृहं प्रविशन्ती दृश्यते। भवतु पश्यावः।

(सर्वे निष्क्रान्ताः)

(इति प्रस्तावना)

(ततः प्रविशतः सुदती सुनन्दा च)

**सुदती** आर्ये! सुनन्दे! समाश्वसिहि। सद्यो विवाहितासि।सहजं खलु मातृगृहत्यागो नारीणाम्। गृहिण्याः अश्रुपातः गृहनाशे प्रवाहायते। समाश्वसिहि।

**सुनन्दा** आर्ये! सुदति! शून्यं मे मनः। ऋते रोदनात् किमपि कर्तुं न पारयामि।

**सुदती** सुनन्दे! विदग्धासि त्वम्। गुणगणभूषितो ते पतिः। आरक्षकवृत्तिं श्रयन् धनमपि सम्यगेवार्जयति। न ते श्वशुरपीडा। ईदृशं सकलसौभाग्यं प्राप्तवती त्वं कुत एवं खिद्यसे।

**सुनन्दा** सखि! दैवायत्तानि भाग्यानि। सकलसुखविधात्र्याः मातुः दुःस्थितिः मां भृशं व्यथयति।

**सुदती** अलं चिन्तया।

**मातुः कार्ये साह्यभूताहमासं**
**सैका श्रान्ता स्यादिति त्वं न रुद्याः।**
**पुत्र्युद्वाहाद्वीतचिन्ता त्वदम्बा**
**प्राप्तोर्जा सा निश्चयेनास्ति हृष्टा ॥३ ॥**

**सुनन्दा** न कापि मे जन्मदात्र्याः मातुः विषये चिन्ता। अस्मद्धात्र्याः भारतमातुः दुःस्थितिं वीक्ष्य शोचामि। यतो हि-

**स्त्रीणामतीवसहजं खलु मातृगेह-**
**त्यागःस्वभर्तृकुलदीपनकारणेन।**
**कष्टाय दारुणगतेः सहनं धरण्या**
**अस्यास्तु मातुरधिका मम जन्मभूमिः ॥४ ॥**

अपि च-

**स्वभूमिं न जहात्येव यथा वृक्षाश्रिता लता।**
**तथा पत्याश्रिता कन्या भूमिप्रीतिंन मुञ्चति ॥५ ॥**

**सुदती** न युज्यते ते कथनम्। त्वत्पतिस्तु आङ्ग्लशासनारक्षकः। विवाहात् प्रागेव ज्ञातमेतद्भवत्या। आङ्लेया एव युवयोः पोषकाः।

**सुनन्दा** धिक् तान् आङ्ग्लान्। त्वमपि तान् अर्चसि। कृष्टेन कृष्टायाः सम्पत्तेः पश्यतोहरास्ते। कृषकपरिवारीया त्वमित्थं न भाषेथाः।

**सुदती** अथ किम्। विवाहात् प्रागेव विज्ञातमासीत्त्वया यन्मे भविष्यत्पतिः आङ्ग्लारक्षक इति। तत्कुतस्तर्ह्येतेन परिणीता।

**सुनन्दा**

**अस्मिन् सर्वगुणान्विते पतिवरेत्वाङ्ग्लाश्रयो दुर्गुणः**
**चन्द्रे कृष्णकलेव गौण स इति स्वीया मतिर्मे पुरा।**
**उद्वाहो वरदक्षिणारहित एवातो न कष्टं पितु-**
**र्यस्येतोपि विवाहयोग्यतनयास्तिष्ठन्ति तिस्रो गृहे॥६॥**

**सुदती** एवम्।

**सुनन्दा** स एव मे आर्यपुत्रस्य लघुर्दोषः श्वेतपत्रे कृष्णबिन्दुरिव मां तुदति।

**सुदती** अलं चिन्तया। धर्ममार्गे एव तिष्ठति ते पतिः। उद्योगः पुरुषलक्षणम्। उद्योगिनं पुरुषसिंहमुपैतिलक्ष्मीः। स्वकृषि-क्षेत्ररहितेन तव पत्याजीविकार्थं काचिद्वृत्तिरालम्बनीया। अद्यत्वे आङ्ग्लेभ्य ऋते को वा उत्तमवेतनयुतां वृत्तिं दद्यात्।

(द्वारकुट्टनशब्दः)

**सुनन्दा** आर्यपुत्रो मे उपस्थित इति भाति। भवतु पश्यामि।

(ततः प्रविशति वस्त्रेण अवगुण्ठितः नानासाहेबः, अवगुण्ठनम् अपनयति)

**सुनन्दा** अहो मे भाग्यम्। स एवैषः। मातृभूमेः स्वातन्त्रमभिलक्ष्य मातृगृहनिकटे जनसभायां भाषितवान् नानासाहेबः। अस्मत्प्रभुः नानासाहेबः मद्गृहम् उपस्थितः। पावनं मे गृहं तीर्थक्षेत्रायते। आर्य! इतस्तावदागच्छ। अर्घ्यपाद्यादिकं स्वीकुरु। अधुनैव भोजनं ते दास्यामि।

**नाना** (स्वगतम्)

**मदीया देशीया सकलजनतास्वार्थनिरता**
**वृथा कष्टेनाहं समरभुवि सङ्ग्रामनिरतः।**
**इतीमं भावं मे परिहरति माता स्ववचनै-**
**र्जनैरेतादृग्भिर्भवति सुदृढा भारतधरा॥७॥**

(प्रकाशम्) मातः! अनुगृहीतोऽस्मि। अपि जानासि स्वाशयेन मह्यं दत्त आश्रयः पाशायेतेति।

**सुदती** अथ किम्। जानात्येव सुनन्दा। तव शौर्यविषय एव सम्भाषमाण आस्वावम्।

**नाना** आर्ये! आरक्षका मामनुधावन्ति। तेषामभिज्ञानं न स्यादिति सपादरक्षोऽहं गृहं प्रविष्टः। क्षन्तव्योयं जनः।

**सुनन्दा** देशरक्षार्थं धावतः ते पादान् रक्षतीदं पादरक्षायुगलम्। तदेव मे गृहस्यास्याभरणम्।

**सामान्यानां स्नानवार्यस्ति हेयं**
**शालग्रामे स्थापितं वारि तीर्थम्।**
**तद्वद्धेदं लोकये प्राप्य पुण्यं**
**पूतात्पादात् पादरक्षाप्रसादम्॥८॥**

**नाना** हन्त। प्रमादोऽपि प्रसादत्वेन स्वीकृत आर्यया।

**सुनन्दा** आर्य! बुभुक्षा त्वां बाधेत। एहि भोजनं परिवेशयामि। अस्माकं रक्षितुः पाकशासनसदृशस्य प्रभोः सामान्यः पाकः परिवेष्टव्यः इति खिद्यते मे मनः।

**सुदती** आर्ये अलं कालयापनेन। परिविश्यताम् शीघ्रम्। आरक्षकाः देशभक्तं प्रभुमनुसरेयुः।

(नेपथ्ये द्वारताडनशब्दः)

**सुनन्दा** मत्पतिरागत इति मन्ये। (विचिन्त्य)। आर्य! त्वं तावत् गृहस्याट्टे लघुप्रगोष्ठे आत्मानं गोपय।

**नाना** कुतो गोपनम्।

**सुनन्दा** सावधानेन भाव्यम्। मत्पतिः आरक्षकाधिकारी। तेन भवतः हानिः स्यात्।

**नाना** अधिकचिन्तनायानुचितः कालोऽयम्। भवतु। तत्रैव गमिष्यामि।

(सुनन्दा द्वारमुद्घाटयति, ततः प्रविशति तत्पतिः सुधीरः
मित्राभ्यां श्रीधर-भास्कराभ्यां सह)

**सुधीरः** प्रिये! मन्मित्रे मया सह वर्तेते। त्वद्धस्तनिर्मितं पानीयं पिपासतः।

**भास्करः** प्रजावति! अपि कुशलं भवत्याः ? अयं सुधीरः नूतनोढां त्वांकथं पालयति ?

**श्रीधरः** कार्यकालेऽपि सर्वदा यस्याः जपं करोति किं तां सकुशलं न पालयेत्-

**चक्रवाकमिथुनं यथा निशि**
**स्वेष्टपक्षिविरहेण रोदिति।**
**तद्वदेष तव दर्शनं विना**
**क्रन्दते च दिवि साश्रुलोचनः ॥९॥**

**सुधीरः** अलमलीकभाषणेन।

**सुदती** किमलीकं भाषितमार्येण। सुनन्दाया अपीयमेव स्थितिः।

**सूर्योदये शीकरहबिन्दुयुक्तं**
**पद्मं यथा याति विकासनं तत्।**
**तथा प्रियस्यागमनेन पश्य**
**हसन्मुखं साश्रु सभावमेतत् ॥१० ॥**

**सुनन्दा** (स्वगतम्) विदग्धा खल्वियं सुदती। मम मुखभावं दृष्ट्वा यथा शङ्का नोदीयात् तथा कृतमेतया। (प्रकाशम्) पानीयमिदं स्वीकुरुत।

**श्रीधरः** अहो पाककुशलता प्रजावत्याः। सामान्यजम्बीररसमपि अमृतायते। कदाचिन्मद्गेहमागत्य इदं कौशलं मे पत्न्यपि पाठ्यताम्।

**भास्करः** प्रतिवेशिगृहावलेहः सर्वदापि रुचिकरः।

**श्रीधरः** अविवाहितोऽसि त्वम्। कथं जानीषे विवाहितानां कष्टानि। तवापि परिणयो भवतु। तदानीं ज्ञास्यसि।

**भास्करः** हतभाग्यस्य मे ललाटे विवाहभाग्यं न लिखितमिति मन्ये। दरिद्रं मां का वा कन्योपसर्पेत्।

**सुधीरः** अलं चिन्तया। सोऽयं नानासेहेबः अस्मत्प्रदेशे सञ्चरतीति वार्ता। तद्ग्रहणेन भूरि धनमुपलभ्यते। भगीरथ इव सर्वप्रयत्नं कृत्वा तं बन्द्ध्स्यामः। तेन धनेन नैकम्, विवाहत्रयमपि कर्तुं शक्नुयाद्भास्करः।

**श्रीधरः** पानीयस्वदनाद्विस्मृतोऽयं नानासाहेबविचारः। (नेपथ्ये मेघगर्जनध्वनिः)

**सुवृष्ट्या तमसा ग्रस्ता निशेयं सुगमा न हि।**
**न धावेदद्य, कुर्यामो ग्रहणं श्वः प्रभातके॥११॥**

**भास्करः** श्रीधर! साधयावस्तावत्।

**सुधीरः** परिणयविषये लब्धावसरस्य पादौ धावतः भास्करस्य।

**भास्करः** नैवम् उपहसनीयम्। श्वप्रभाते मेलिष्यामः। नानासाहेबं ग्रहीष्यामः। (द्वावपि गच्छतः)

**सुदती** आर्ये! वृष्टिचिह्नानि दृश्यन्ते। कृषिकार्यं परिसमाप्य समागच्छेन्मे पतिः। प्रथमवृष्टौ नूतनस्य ते गृहस्य छतिः स्रवेत्। युवां मद्गेहम् आगच्छतम्। तत्रैव स्थितिः वरमिति मन्ये।

**सुधीरः** (सक्रोधम्) सुदति! आरक्षकोऽस्मि। परीक्ष्यैव क्रीतमिदं गेहम्। मुसलवृष्टावपि जलबिन्दुः न प्रविशति मद्गृहे। कथमेवमपलपसि।

**सुनन्दा** आर्य! मयि प्रीत्यतिशयेन इत्थमुक्तम् सुदत्या। क्रुद्धेन न भवितव्यम्।

**सुधीरः** आर्ये! सुदति!क्षन्तव्योऽयं जनः। आरक्षकवृत्त्याश्रयेन ईदृशं कार्कश्यं मे वचनेषु। गृहमिदं सुदृढम्। न कापि चिन्ता। यद्यपेक्ष्यते निस्सङ्कोचं प्रविशाव त्वद्गृहम्।

**सुदती** (सखेदम्) साधयामि तावत्। शुभरात्रिः। (निर्गच्छति)

**सुधीरः**

**वृष्टेर्धारा श्रुतिरिरितिमतिर्मेघशब्दो मृदङ्गः**
**विद्युत्स्फारः सुखयति निशावेदिकायां मनो मे।**
**तत्राहं स्यां रमणकुशलो नायको नायिका त्वं**
**नाट्यं रम्यं रहसि लसतु स्वादु शृङ्गारमुख्यम्॥१२॥**

**सुनन्दा** (सकम्पनम्) आर्यपुत्र! कार्याधिक्याच्छ्रान्तोऽसि। एहि भोजनं कुर्वहे।

**सुधीरः** प्रिये! कुतस्तेऽङ्गेषु वेपथुः।ध्वनिरपि भृशं कम्पते। अपि कुशलिनी भवती।

**सुनन्दा** आर्यपुत्र!किं न स्मरसि। विदर्भसञ्जाता अहम्। विवाहात्परं त्वया सह सैहाद्रिपर्वतप्रदेशं समागता। वर्षाकालीनः शीतलो वायुर्मां कम्पयति।

**सुधीरः** अहमस्मि ते कम्पवारणाग्निः। आलिङ्ग माम्। शैत्यं ते दूरीभविष्यति।

**सुनन्दा**

**मनसि भवति शैत्यं तापनं वा कदाचि-**
**न्मनसिजशरहेतोस्तच्छमः प्रेमिसङ्गात्।**
**ऋतुसहजविलासाद्देहबाधो यदि स्या-**
**त्कृतकपरिकरैस्तद्वारणं चिन्तनीयम्॥१३॥**

**सुधीरः** गृहीतं त आकूतम्। कन्येयं शीतलदेशं प्रयातीति त्वद्बन्धुभिः विवाहकाले कम्बलानि प्राभृतीकृतानि। तत्सहाय्येन उष्णं कुर्वे प्रियाशरीरम्। इहास्ति तत्कम्बलम्।

(पादरक्षां दृष्ट्वा साशङ्कम्)

**कथं पादरक्षा गृहान्तःप्रविष्टा त्वमाचारशीला गृहे नत्वदन्या।**

**सुनन्दा**

**भवन्मित्रसंलापकाले त्वयैव खलु स्थापितेयं गृहे पादरक्षा ॥१४॥**

**सुधीरः** किमसम्बद्धं प्रलपसि। आङ्ग्लशासनेन दत्तां कृष्णवर्णीयां पादार्धव्यापिनीं पादरक्षां धृत्वैव खल्वहं कार्यं करोमि। नैषा मम पादरक्षा।

**सुनन्दा** (साशङ्कम्)आर्य! न कोऽप्यन्योऽस्ति ऋते आवाभ्याम्। तत्कुतः पादुकेयं समागता?

**सुधीरः** पश्य। पादचिह्नानि। इत एव कश्चित् अट्टमारूढः इति भाति।

**सुनन्दा** (सकम्पम्) अहं तु गृहस्था एव निर्निमेषं पश्यन्ती आसम्। न कोऽप्युपरि गतः।

**सुधीरः** भवतु पश्याम्यहम्।

**सुनन्दा** न गन्तव्यं न गन्तव्यमार्यपुत्रेण।

**सुधीरः** (सक्रोधम्) कुतो मेऽवरोधः। (पादरक्षां पुनरालोक्य) आरक्षकालये दृष्टे नानासाहेबस्य आलेख्यचित्रे ईदृशी एव ननु पादरक्षा। विज्ञातं सर्वम्।

**सुनन्दा** (स्वगतम्) इतो मिथ्या वृथैव। भवतु सत्यमेव वदिष्यामि।(प्रकाशम्) आर्य! संरक्ष्याः भारतभूरक्षकाः। दण्ड्याः खलु ते परकीयाः।

**सुधीरः** (सक्रोधम्)

**आङ्ग्लेयाः स्युर्दुर्जनाः किञ्च ते मे**
**सौख्यं प्रादुः सेवकोऽस्म्येष तस्मात्।**

**नूनं सेव्या भार्यया च त्वयापि**
**भीष्मादीनां वर्तनानि स्मरन्त्या ॥१५॥**

**सुनन्दा** आर्य! न खलु मातुर्द्रोहो युज्यते। दुष्टसमूहे तिष्ठता भीष्मेणापि न कदापि मातृद्रोहो समाचरितः।

**जन्मदां पितृपत्नीं च मातृभूमिं पितामहः।**
**गङ्गासत्यवतीभारताख्या मातॄरपालयत् ॥१६॥**

**सुधीरः** प्रिये! किमर्थमेवं चिन्तयसि। नाङ्ग्लेया दुष्टा यवनैरिव। स्वधर्मं पालयन्ती, पूजाव्रतादिना सह प्रजाव्रतमप्यनुतिष्ठन्ती सुखेन जीवितुमवसरं कल्पयन्त्याङ्ग्लेयाः।

**सुनन्दा** ज्ञायते सौजन्यमेतेषाम्। भस्माच्छादितमङ्गारमिव समग्रं देशं दहन्ति।

**सुधीरः** सुनन्दे!तूष्णीं तिष्ठ। आङ्ग्लेयैर्दत्तमन्नं भुञ्जानासित्वम्। नैष भुक्तस्य द्रोहः मराठानां यशसे।

**सुनन्दा** अद्यान्नं दत्त्वा सम्पन्नयन्ति। गच्छता कालेन अन्नमेव अस्मद्धस्तादाकर्षन्ति। परकीयदास्यं कथं मराठैः सह्येत।

**सुधीरः** सुनन्दे! नानासाहेबं बध्नीमः। अपारा सम्पत्तिः आङ्ग्लेयैर्दास्यते। तेन सुखेन जीवितुं शक्यम्।

**सुनन्दा** नाहं नानासाहेबबन्धनायावसरं दास्यामि। नानासाहेबवर्य!छतेराच्छादनं छित्त्वा पलायस्व ततो जवात्।

**सुधीरः** (चपेटिकां दत्त्वा)अपसर तावत् नानासाहेबं ग्रहीष्यामि।

**सुनन्दा** (सक्रोधं रुदती) किं ताडनेन। न मुञ्चामि मार्गम्। मुञ्चामि प्राणान्।

(ततः प्रविशति नानासाहेबः)

**नाना** आरक्षकार्य!

**नानासाहेबनामा भरतभुविपुनर्भारताम्बाविलासं**
**द्रष्टुं स्वप्राणहानिं न गणयति परं वीरनारीविलापे।**

**हेतुर्भूत्वा न तिष्ठेत्क्षणमपि, निगडैर्बन्धनं मे कुरु त्वं**
**माता नैवास्ति वन्ध्या जनयति तनयान्मादृशान्देशभक्तान् ॥१७ ॥**

**सुधीरः** (सहर्षम्) अये... हरिणः स्वयं सिंहस्य मुखे पतितः।

**सुनन्दा** श्रृगालापेक्षया कपटबुद्धिः कातरस्तवमात्मानं सिंहसदृशं मन्यसे।

**सुधीरः** (साक्रोशम्) न युक्तं ते कथनम्। सर्वं मत्प्रियाया भवत्याः सौख्यार्थमेव। एनं बद्धाभूरि धनं सम्पाद्य सुखेन जीविष्यावः।

**सुनन्दा**

**प्रियासुखकरं न भूरि वसु मातृभूरक्षणं**
**न बन्धनमिदं कुरु त्वमिति मेऽस्ति संयाचनम्।**
**लताप्रियकरं भवेदिति तु भूमिनाशे मति**
**र्बुधस्य यदि जायते कथमियात्सुखं सा लता ॥१८ ॥**

**सुधीरः** किं लतायाः वृक्षस्यापेक्षया भूमेरेवाश्रयो महीयान्।

**सुनन्दा** अथ किम्।

**सुधीरः** अप्रबुद्धासि।

**रत्नं गर्भे धृत्वा भारतमाता ददाति सौख्यानि।**
**तद्दत्त्वा हस्ते ते सौख्यं दास्यन्त आङ्ग्लजनाः ॥१९ ॥**

**सुनन्दा** तेऽसौख्यं दास्यन्त इति युक्तमुक्तं भवता।

**सुधीरः** वामार्थं कल्पयसि वामा त्वम्। किमर्थं मद्वचनानि नावगच्छसि।

**सुनन्दा** सर्वमवगच्छामि नूनम्। मातृद्रोहिणं त्वां परिणीतवतीति दौर्भाग्यं मे। किमतिविस्तरेण। मन्नेत्राभ्यां देशभक्तस्य बन्धनं न द्रष्टुमीहे।

**सुधीरः** (लगुडं गृहीत्वा) नाहं भावैर्बद्धो भवामि। लगुडेनैनं बध्नामि।

**सुनन्दा** (भुशुण्डीमुरसि स्थापयन्ती तयोर्मध्ये स्थित्वा)। पिञ्जनोदनेनादौ मां गतासुं कृत्वैवैनं बद्धुमर्हसि।

**नाना** नानुचितमाचरणीयमार्यया।

**सुनन्दा** नानासाहेबवर्य!

**मातुर्दुखं सह्यते दुःखनाशस्त्वादृग्भिस्याद्राष्ट्रभक्तैर्भविष्ये।**
**आशाबन्धो बध्यते चेन्ममैते प्राणा देहे स्युः कथं ब्रूहि मां त्वम्॥२०॥**

**सुधीरः** (सबाष्पम्) आर्ये! प्राणेभ्योऽपि प्रियं ते मातृभूरक्षणम्। त्वत्सुखाय धनं सम्पादयामीति कृत्वा इत्थमाचरितं मया। यदि ते राष्ट्ररक्षणमेव सौख्यं तर्ह्यहमपि त्वत्सौख्यं कामये।

**नाना** परिवृत्तमस्त्यस्य मनः। इदं खलु धीरनारीमनोबलम्।

**सुनन्दा** आर्यपुत्र! बुभुक्षितोऽस्ति वीरपुरुषः नानासाहेबः। तं भोजयावस्तावत्। राष्ट्रार्थं तेनाग्रे बहु कर्तव्यम्।

**सुधीरः** आर्य! इत इतो भवान्।

**नाना** आर्ये! त्वया पत्युः मनः परिवर्तितम्। नापेक्ष्यते भारतमाता त्वत्सदृशपुत्र्या ऋते अन्यान् देशभक्तान्। निश्चयेन भारतमाता मुक्तदास्या भविष्यति।

**सुनन्दा** भारतमातुः दास्यनिवृत्तिः। श्रवणमात्रेणैव रोमाञ्चो जायते।

**नाना** सत्यम्। ततः परं किमपेक्ष्यते।

**सुनन्दा** न किमपि। तथापीदं भवतु।

**आङ्ग्लेयास्तु प्रयान्ति दुर्गुणगाणास्तत्पाठिताः स्युर्गताः**
**भान्त्वाभा मम भारतस्य भवताद्देशस्तु विश्वाग्रणीः।**
**गोक्षीरं सदुदारसूक्तिरिति तद्राजेद्द्वयं चामृतं**
**देशे रामशिवाजिनन्निभनृपाः रक्षन्तु धीरा जनान्॥२१॥**

(सर्वे निष्कान्ताः)`

॥समाप्तेयमेकाङ्किका॥

॥श्रीशारदार्पणमस्तु॥

*****

# ॥ करुणा ॥[1]

**डॉ.जिगरः म. भट्टः**[2]

## पात्राणि

| | | |
|---|---|---|
| १ | **सूत्रधारः** | |
| २ | **नटी** | |
| ३ | **शान्ता-** | गृहकर्मपरा कुटुम्बिनी |
| ४ | **धीरजः-** | शान्तायाः पतिः |
| ५ | **विरलः-** | शान्तायाः पुत्रः |
| ६ | **वैद्यः-** | शान्तायाः चिकित्सकः |

**ओषधीनां पतिं वन्दे सर्वरोगनिवारणम्।**
**मूर्ध्ना तमथवा धत्ते तं शिवं सर्वशङ्करम्॥१॥**

(नान्द्यन्ते, ततः प्रविशति सूत्रधारः)

**सूत्रधारः** अयि भोः! कर्णव्याधिपीडितस्य मे नास्ति कुत्रापि स्फुटशब्दाभिव्यक्तिः, क्व च मे कुटुम्बिनी वर्तते मत्कर्णरूपा? यां विना न किमपि श्रूयते श्रूतं वोपहसनीयतां याति। (उच्चैः) अयि कुटुम्बिनि! क्वासि?

**नटी** (वस्त्रेण मुखं प्रोच्छन्ती प्रविश्य) आर्य! इयमस्मि। वस्त्रप्रक्षालनाय नदीकूलं गताऽऽसम्।

**सूत्रधारः** किं ब्रवीषि? नदीप्रक्षालनाय वस्त्रकूलं गताऽऽसीः? तत्किं प्रयोजनं नदीप्रक्षालनस्य?

---

१ राष्ट्रिय-संस्कृत-एकाङ्किरचनास्पर्धायां द्वितीयपुरस्कारेण सभाजितं रूपकम्

२ सहायकाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

**नटी** (आत्मगतम्) सुखाभिलाषिण्या केन बधिरेण गृहस्थाश्रमः स्थापितो मया? (प्रकाशम् उच्चैः वस्त्रं दर्शयित्वा) वस्त्रप्रक्षालनाय गताऽऽसम्।

**सूत्रधारः** तच्छनैर्भण किञ्चित्, नाहं तावान् बधिरो यावान् लक्ष्ये। श्रुणु, इह खलु नगरे कश्चिद्योगी सम्प्राप्तोऽस्ति, यो मन्त्रशक्त्या जन्मजन्मान्तरवर्तिनोऽपि रोगान् दूरीकुरुते। तर्हि तत्सकाशं यावो, येन मे कलिप्रभावविलुप्तश्रुतिविद्येव श्रुतिशक्तिः पुनरुद्भवेत्।

**नटी** आर्य! नाहं विश्वसिमि तादृशे कस्मिँश्चिद्योगिनि कलिप्रभावात्। अस्मिँश्च पुनर्विज्ञानविकासोत्कर्षप्रकर्षकाले कस्य वा मूर्खस्य विषवृक्ष इव पाखण्डिनि श्रद्धा स्यात्? तन्नाहं गन्तास्मि।

**सूत्रधारः** किं भणसि? विषं पिबेति? पाखण्ड्यहम्? न त्वया सह वदिष्यामि, गच्छ।

**नटी** (आत्मगतम्) रे भगवन्! किं करोम्येतस्य। (प्रकाशम् उच्चैः) न कश्चिद्योगी, वैद्यस्तावद्गन्तव्यः। कुतः -

**व्याधयः कलिकालेऽस्मिन् नैव शाम्यन्ति योगिभिः।**
**पिपासाशमनं तावत् कुरुते न मरीचिका[३] ॥२॥**

**सूत्रधारः** वैद्ययोगिनोर्मध्ये तावत्कुतो मरीचिका निःक्षिप्ता त्वया? स्पष्टं ब्रवीमि नाहं मरीचिकां खादितास्मीति।

**नटी** (उच्चैः) ननु वैद्यो गन्तव्य इति भणामि धीमन्! रोगास्तूपचारेण शम्यन्ते, कलिहेतुनान पुनर्योगिभिः। कुतः -

**याज्ञवल्क्यो मुनिर्व्यासो वसिष्ठोऽगस्त्य एव वा।**
**पुराणाः सिद्धपुरुषा वर्तमानास्तु "ढोङ्गिनः" ॥३॥**

---

३ मृगतृष्णा मरीचिका इत्यमरः।

किन्तु न जाने कथमिह लोका विश्वसन्त्येवम्भूतेषूपचारव्याजेन गूढविप्रियकारिषु। पश्यैतान् कोरोनाग्रस्तान् अविश्वस्तौषधीन् विश्वस्तपापाचारिणः। कथन्नु खल्वेतेषां कल्याणं भूयात्?

**सूत्रधारः** किं ब्रवीषि? कस्य कल्याणं कर्तव्यम्? कस्मै औषधं देयमिति?

**नटी** चेदेतस्यैवमेव स्थास्यति, मयापि बधिरयानुभूयते। (हस्तेन गृहीत्वा) अहमेव नयाम्येनमौषधालयम्। (आत्मगतम्) सर्वासामपि कुटुम्बिनीनामेषैवावस्था दयनीया। न कोऽपि भर्ता कुटुम्बिनीं श्रुणुते, अयं पुनर्बधिरः।

(इति निष्क्रान्तौ)

(ततः प्रविशति शान्ता धीरजो विरलश्च)

**धीरजः** अयि शान्ते! क्वासि? मत्पादांशुकं न पश्यामि, कुत्र स्थापितम्?

**विरलः** मातः! बुभुक्षितोऽस्म्यतीव। तत्खादितुं किमपि देहि।

**धीरजः** न पुनरवलोकयामि मत्करवस्त्रं घटीं च। (उच्चैः सकोपम्) शान्ते! कथमिव शान्ताऽसि, देहि मे प्रतिवचनम्।

**विरलः** (पब्जी क्रीडन्) मातः! किमद्यापि नानीयते खाद्यं किमपि?

**उभौ** (सक्रोधम्) शीघ्रमेहि।

(ततः प्रविशति शाटिकाप्रान्तेन करौ प्रोच्छन्ती शान्ता)

**शान्ता** किमारब्धमेतत्?

**प्रातः प्रातः समुत्थाय शान्ते शान्ते निरन्तरम्।**
**वदतोर्युवयोर्ज्ञेयमेका शान्ता गृहे स्थिता ॥४॥**
**धीरजे नास्ति तद्धैर्यमिति ज्ञातं विवाहिते।**
**विरले तत्कथं वा स्यात्तस्यापत्येऽधिकप्रिये ॥५॥**

तद्ब्रूतम्। कोऽयं कोलाहलातिशयः? किं नभः पतितं वा क्षितिश्चलिता?

**धीरजः** कार्यालयो मया गन्तव्यो न त्वया। शतधोक्तं मदीयानि सर्वाण्यपि वस्तूनि यथासमयं यथास्थानं स्थापयेति। तन्न त्वया क्रियते कालश्च मेऽत्येति।

**शान्ता**

**अहमेकाकिनी कार्याण्यनेकानि गृहस्य च।**
(धीरजं प्रति) **गृहिणीनां शतं नास्ति**
(विरलं प्रति) **न वा ते जननीशतम्॥६॥**

**धीरजः** तत्किं नवीनमाचर्यते?

**स्त्रिया हि करणीयानि गृहकार्याणि सर्वथा।**
**पुरुषा धनसम्प्राप्त्यै बहिः कुर्वन्ति च श्रमम्॥७॥**

**शान्ता** किन्तु तवायं शूरः शत्रुविमर्दनः पुत्रस्तु वृथा शयनीयं भङ्क्ते। नास्ति कापि प्रवृत्तिरेतस्यादिनं पापयन्त्रेण क्रीडतः। किञ्चित्तं ब्रूहि, स खलु ते पादांशुकम्, घटीम्, करवस्त्रम् अन्यानि च वस्तूनि दातुं शक्नोति। न मातुः साहाय्यं क्रियते, न तातस्य सहकारीभवति। पूर्वं राम आसीद्यः पितुराज्ञया वनं जगाम, अद्य त्वत्सदृशसुतकारणात् पित्रोर्वनगमनमुत्प्रेक्षे।

**विरलः** (क्रीडन्नधोमुख एव) मातः!क्रीडायोग्ये वयसि क्रीडा विधेयेति नियमः। पुनश्च ते कर्तव्यं सुतपरिपालनम्, तद्देहि किमपि खाद्यम्।

**शान्ता** (निःश्वस्यात्मगतम्) किं क्रियते यत्र राजेव स्वामी, सुतश्च प्रमादी। दासीयते मयानयोर्मध्ये। न गृहिण्या आदरो न मातुः। सत्यं खलु -

**कलौ स्त्रीजन्म दुःखाय यत्र नारी तु सेविका।**
**गार्ग्यपालानसूयाद्या धन्या नार्यो कृतेऽभवन्॥८॥**[४]

**धीरजः** किं नाद्याप्यानयसि मे वस्तूनि? (सक्रोधम्) त्वरस्व त्वरस्व।

---

४ कृते- कृतयुगे, कलेः पूर्वमित्याशयः

**शान्ता** (सर्वमानीय समर्प्य च) श्रृणु, यथासमयं भोजनम् ...

(इत्यर्धोक्तमश्रुत्वा धीरजो निष्क्रान्तः)

**विरलः** (क्रीडन्नेव) मातः! तातस्तु प्रस्थितः। मह्यं किमपि खाद्यं देहि।

**शान्ता** आगच्छ बहिः। शयनीये न खलु खादनीयम्।

**विरलः** अम्ब! सर्वदोपदेशानेव प्रयच्छसि। न जानास्यस्माकमाधुनिकीं पद्धतिम्। तस्यां खलु -

**यदा यत्र बुभुक्षा स्यात्तदा तत्रैव खाद्यते।**
**यूनामाधुनिकानां तु शयनं वाऽऽसनं समम्॥९॥**

**शान्ता** नैषाऽऽधुनिकता वत्स! एषा खलु राक्षसी भक्षयति यूनस्तद्भविष्यच्च। उक्तं खलु पौराणिकैर्मुनिभिः - अन्नं न निन्द्यात्, तद्व्रतम्, अन्नं ब्रह्मेति व्यजानादित्यादि। किञ्च -

**यथाऽन्नं भुज्यते पुत्र! तथा धीः परिवर्तते।**
**उपविश्य शुचिस्थाने तत्कुर्यात् भोजनं सदा॥१०॥**

तदागच्छ। ददामि स्वादु प्रातराशम्। विशेषतस्तुभ्यं पक्वम्।

**विरलः** (अनिच्छयोत्थाय) आगच्छामि।

(इति निष्क्रान्तौ)

(ततः प्रविशति वैद्यो धीरजश्च)

**धीरजः** वैद्यवर! को व्याधिः शान्तायाः? कोरोना नास्ति खलु?

**वैद्यः** तदेव सम्भाव्यते लक्षणदर्शनेन। तद्विश्रामो देयोऽस्यै निरन्तरम्। कोरोना-मार्गदर्शिका सर्वथा परिपालनीया। एषा तावदेकाकिनी शयीत प्रकोष्ठतरे निवसेत्। उचितमन्तरेणानया व्यवहर्तव्यम्। एतच्चौषधं वारत्रयं देयम्। आवश्यकतायां सत्यामहं स्मर्तव्य इति।

**धीरजः** एवमस्तु।

(वैद्यो निष्क्रान्तः)

**धीरजः** कथमधुना गृहकार्याणि भविष्यन्ति सर्वाणि?कथं कार्यालयं गमिष्यामि प्रतिदिनम्? (विचिन्त्य) अथवा एतस्यास्तावन्ति गभीराणि लक्षणानि तु न लक्ष्यन्ते। करिष्यतीयमेव सर्वम्।

**शान्ता** (सश्रमं प्रविश्य शनैः) किमभाणि वैद्येन?

**धीरजः** न किमपि। स्वस्थासि सर्वथा। तत् प्रतिदिनमिव गृहकार्याणि साधय।

**शान्ता** एवमस्तु। (निष्क्रान्ता, विरलः प्रविशति)

**विरलः** मातः! क्वासि? गन्तव्यं खलु परीक्षायै। तद्देहि मे स्यूतादीनि वस्तूनि, मुखावरणं करशुद्धिद्रव्यं च।

**धीरजः** मयापि कार्यालयो गन्तव्यो नाम। अपि नाम सिद्धं भोजनम्?

**विरलः** मातः! त्वरस्व। न जानास्यनभ्यस्ताऽभ्यासस्य महत्त्वम्। विलम्बे सति हानिर्मे भविष्यति। (शनैः) कुतो लब्धेयमनभ्यस्ता स्यात् पित्रा?

**शान्ता** (प्रविश्य सश्रमं दीर्घमुष्णं च निःश्वस्य) मय्यस्वस्थायां धैर्यं धरतम्। प्रतिदिनं वां सर्वकार्याणि साधयाम्येव। किञ्चित् स्वयमपि कुरुतम्। यदि मरेयम्, किं भवेद्युवयोः?

**धीरजः** अतिजल्पितम्। देहि मे स्यूतं पाथेयं च।

**विरलः** मह्यमपि।

**शान्ता** (शनैर्द्वाभ्यां यथावश्यकानि वस्तूनि समर्प्य विरलं प्रति) ईश्वरं प्रणम्य गम्यताम्। परीक्षारम्भः खलु।

**विरलः** तथाविधाचरणानां व्यर्थानां कृते नास्ति कालः। तद्गच्छामि। (इत्युक्त्वा निष्क्रान्तः)

**शान्ता** कथं गतः? (धीरजं प्रति) यथासमयं भोजनम् ... (इत्यर्धोक्ते) अयमपि गतः। स्वस्था नास्मीत्यनुभूयते। शरीरं पुनः दुर्बलं प्रतीयते। मन्येऽद्य कार्याणि न साधयितुं शक्यानि। किन्तु -

**गृहिणीनां कुतः शान्तिश्शान्ता चेद् गृहिणी कथम्।**
**पुरुषाणां गृहे शान्तिर्गृहिणीनां गृहेऽपि नो॥११॥**

(दीर्घं निःश्वस्य) तदयं महानसः। प्रविशामि तावत्। (विचिन्त्य) अद्य खलु विरलस्य परीक्षारम्भः। गृहमागत्य भणिष्यति मातः! शीघ्रं भोजनं देहि। अद्य तूत्तमा परीक्षा सम्पन्नेति। तस्मै किमपि मधुरं पचामि। (सस्मितम्) धीरजायापि मधुरं रोचत एव। तयोरानन्द एव ममानन्दः। (शिरो गृहीत्वा) कथमधुना शिरोवेदना भृशं पीडयति माम्। किमपि द्रष्टुं न .... (इत्यर्धमुक्त्वा मूर्च्छति)

(ततः प्रविशति विरलः)

**विरलः** अद्य तु सम्पन्ना परीक्षा। क्लिष्टाः प्रश्ना आसन् किन्त्वहमपि विरलो वर्ते। सर्वेऽपि समाहिताः। (पुरतोऽवलोक्य) तदेतद् गृहम्। यावत् प्रविशामि। (प्रविश्य, भूमौ पतितां शान्तामवलोक्य ससम्भ्रमम्) मातः! मातः! कथमेवं भूमौ शयिताऽसि। (करेण स्पृष्ट्वा) हन्त!महानसचूलिकाग्निसंस्थापितमृत्पात्रमिवास्या अङ्गानि तपन्ति। कथमेतावान् ज्वरः। मातः! मातः! उत्तिष्ठ। अत्र शेष्व। (स्कन्धाधारेण शान्तां पर्यङ्के शाययित्वा) वैद्यमाह्वयामि तावत्।

(दूरभाषेण संवादं कुर्वन्) नमस्ते वैद्यवर! माता मे मूर्च्छिता। तपति च तच्छरीरमत्यन्तम्। किं भण्यते? माता कोरोनाग्रस्ता वर्तते? पिताऽपि सूचितो भवता? तत्किमधुना करोमि? किमुच्यते? उचितेनान्तरेण सा व्यवहर्तव्येति? एवम्। यथासमयमौषधमपि देयम्? एवमस्तु। (दूरभाषं संस्थाप्य, शान्तां करुणया पश्यन्) मातः! प्रातर्मम व्यवहार उचितो नासीत्। किन्नाम प्रातरेव, प्रतिदिनं मे व्यवहारोऽसाधुरेव भवति। त्वं कोरोनाग्रस्तेति तातेनापि न सूचितम्। आगच्छतु सः। अद्य शान्तापुत्रेण तस्य संवादो

भविता। (विचिन्त्य) त्वया किमपि भुक्तं न वा? मातः! सचेतना भव। पश्याहमागतः। मातः! (इति रोदिति)

**शान्ता** (अर्धनिमीलितनेत्रा शयाना सती) किमभूद्वत्स? कथं रोदिषि? तेऽद्यतनपरीक्षा सम्पन्ना खलु। (दौर्बल्येन पुनर्मूर्च्छति)

**विरलः** (सबाष्पमात्मगतम्) अस्वस्थापि मे परीक्षामधिकृत्य पृच्छ्यत इति मातृहृदयमनुभवामि।

(नेपथ्ये)

एवमस्तु। करिष्ये नूनम्। ननु कार्यालय एव प्रथमः कल्पः। न न, गृहचिन्ता नास्ति कापि।

**विरलः** मन्ये तातस्समागतः। तत्पश्यामि द्वारि। (इत्युत्थाय द्वारं प्रति गच्छति)

(ततः प्रविशति "एवमस्तु" इत्यादि वदन् धीरजः)

**विरलः** तात! कथं न त्वया सूचितं मे माता कोरोनाग्रस्तेति। अद्य खलु ...

**धीरजः** (विरलं मध्ये स्थगयित्वा) न भयप्रदं किमपीति न सूचितस्त्वम्। पुनश्च गृहकार्याण्यपि साधनीयानि खलु। तत्ते मातरं विना केन सम्पाद्यते? परीक्षा च ते वर्तत इति न सूचितम्। क्वास्ते ते माता? (उच्चैः) शान्ते! शान्ते!

**विरलः** तात! अति नाम निष्ठुरोऽसि। अद्य खलु परीक्षां सम्पाद्य मय्यागते भूमावस्वस्था मे जनन्यवलोकिता। सा च श्वसितुमप्यसमर्था। पृष्टे च वैद्ये तेन सूचितं कोरोनाग्रस्तेति। तज्ज्ञातपूर्वोऽपि त्वं नाभाषत। (अश्रूणि मुञ्चन्) पश्य मे मातरमेतादृशीमवस्थामापन्नाम्।

**धीरजः** किन्तु कार्यालयः ... (इत्यर्धोक्ते)

**विरलः** ज्वलतु नाम ते कार्यालयः। मातरमसहायां मे कृत्वा त्वया सहाहमपि पापभागिति धीङ्गां कुपुत्रं जननीप्रसवपीडाकारणम्।

**धीरजः** (शान्तामुपसृत्य) शान्ते! कथमनुभूयते? अपि नाम श्रूयन्ते मे पदानि?

**शान्ता** (शनकैः निमीलितनेत्रा सती) किमागतस्त्वं विरलतात! विरलस्यापि परीक्षा सम्पन्नेति प्रसन्नास्मि। शीघ्रं वां समधुरं घृतपायससमन्वितं भोजनं सेत्स्यति। (इत्युत्थातुमिच्छति) मे वत्सलाय पुत्राय ... (इति पुनः मूर्च्छति)

**धीरजः** (विरलं प्रति) कानिचिद्दिनानि बहिः पक्वमन्नमास्वादयावः। एषा विश्रम्यतां तावत्।

**विरलः** कथमद्यापि न जानासि मातुरवस्थां भोजनमेव चिन्त्यते च। तन्नाहं खादितास्मि मातरं विना। स्वयमास्वादय झोमेटो भोजनं भावविहीनम्।

(धीरजोऽनाकर्ण्य दूरदर्शनं चालयति)

**धीरजः** हन्त! किं दृश्यत एतत्? कोरोनाया विकटतां परिशील्य सर्वकारेण निषेधा आदिष्टाः? किम्?

**गृहाद्बहिर्न गन्तव्यम्!!!**
**नाटनीयमितस्ततः!!!**
**भृत्यान् नैवाह्वयेत् कोऽपि**
**विपणी च विसर्जिता ॥१२॥**

तत्कथमद्योदरपूर्तिर्भवेत्? (विचिन्त्य) एवमस्तु। (दूरभाषसंवादं नाटयन्) कानि कानि खादनीयानि सन्त्यद्य विशेषतः? किम्? सर्वकाराज्ञया पिहितं सर्वम्? किमपि न प्राप्स्यत इति? (दूरभाषं संस्थाप्य) विपत्तिः खलु। गृहिण्यस्वस्था, बहिस्तु प्रतिबन्धः, बुभुक्षया च प्राणाः प्रयातुकामाः। (विचिन्त्य) अहमेव पचामि स्वादिष्टं

भोजनम्। (इति निष्क्रम्य पुनः प्रविश्य) हा धिक्। संस्काराय निःक्षिप्तं तैलं तु ज्वलितम्। (सततं छिक्कां नाटयन्) भगवन्! का परीक्षा?

**विरलः** किमभूत्तात! क्वास्ति ते झोमेटो-भोजनम्? किमर्थं पुन-स्सततं छिक्क्रियते? (आघ्राय) आं ज्ञातम्। स्वयं पक्तुकाम-स्त्वं महानसं तु प्रविष्टः किन्त्वनभ्यासेन ज्वलितसंस्कारतैलो बहिरागतः खलु। वदामि पुनर्विश्वासेन -

**सुखं शान्तिश्च सस्नेहं भोजनं मधुरं तथा।**
**मातरं मे विना क्वापि न भूतं न भविष्यति ॥१३॥**

**धीरजः** सत्यं खलु शान्तेव भोजनं पक्तुं न शक्यते। किन्त्वहमपि धीरजो वर्ते, करिष्ये किमपि पुनर्यत्नेन भोक्तव्यम्। (इति पुनर्गच्छति महानसम्)

**विरलः** कथमितोऽपि न निवर्तते स्वहठात् तातः। पश्यामि तावत् किं विधीयतेऽनेनेति। (दृष्ट्वा) किं पुनः प्रस्थापित-पात्रस्तातः। तण्डुलान् प्रक्षालयन्निवाभिलक्ष्यते। मन्ये संस्कृतोदनं[५] चिकीर्षति।

**धीरजः** (प्रविश्य सगर्वम्) पश्य स्वाद्वोदनम् आस्वादयिष्यते मया। त्वं तावज्जननीक्रोडप्रियस्तिष्ठ बुभुक्षित एव।

**विरलः** (नासिकया जिघ्रन् सस्मितम्) कुतोऽयमनाघ्रातपूर्व आमोदो विस्तीर्यतेऽस्मिन् प्रकोष्ठे?

**धीरजः** (जिघ्रन् ससम्भ्रमम्) कथं मया संस्कृतमोदनं ज्वल्यते? (सत्वरं निर्गम्य सपात्रं प्रविश्य च) हन्त! ओदनेन सह बुभुक्षाऽपि भस्मीभूता।

**विरलः** किन्तु तात! पात्रमेतत् प्रक्षालनीयं खलु।

**धीरजः** त्वं प्रक्षालय।

---

५ पुलाव इति व्यवहारे

**विरलः** ओदनं केन पक्वम्?

**धीरजः** मया खलु।

**विरलः** बुभुक्षा कस्यासीत्?

**धीरजः** ममैव।

**विरलः** तत् केन प्रक्षाल्यमिदं पात्रम्?

**धीरजः** मया खलु।

**विरलः** (सहासम्) तर्हि क्रियतां पात्रप्रक्षालने प्रथमोऽभ्यासः।

(धीरजो निष्क्रान्तः)

**विरलः** अम्ब! पश्य तावत् तातचरणानां पुरा नृपायमानानामद्यतनं स्वरूपम्। मन्ये कश्चित् परिवर्तनमीयादनेनानुभवेन।

**धीरजः** (प्रविश्य) शान्ते! तद्ब्रूहि, पात्रस्याधो ज्वलितं सम्पृक्तं च धान्यं कथङ्कारं प्रक्षाल्यते? कृतेऽपि महत्प्रयत्ने न शुध्यति।

**विरलः** तात! स्वपिति मेऽम्बा। शनैरुच्यताम्।

**धीरजः** (शनैः) कथमेतत्सर्वं प्रतिदिनं साधयति तेऽम्बा। अहं त्वेकेनैव दिनेन श्रान्तः।

**शान्ता** (शनैरुत्थाय घटीं दृष्ट्वा सपीडम्) अतिक्रान्तो भोजनकालः। बुभुक्षितौ च युवामिति शीघ्रं सम्पादयामि पाकक्रियाम्। (इति महानसं प्रवेष्टुमिच्छन्ती तद्द्वारि उपविश्य) न मे पादयोरस्ति सामर्थ्यम्। वत्स! देहि मेऽवलम्बनं यावत् साध्यते पाकक्रिया। (विरलमवलम्ब्य उत्थिता पुनर्मूर्च्छिता च)

**धीरजः** कथमेतावान् व्याधिरिति नानुमितं मया। वैद्यं ब्रवीमि। (इति शान्तां पर्यङ्के संस्थाप्य दूरभाषसंवादं नाटयति) वैद्यवर! आगच्छ शीघ्रम्।

(ततः प्रविशति वैद्यः)

**वैद्यः** किमभूत्? अपि नाम कुशलं शान्तायाः?

**धीरजः** नैव कुशलं प्रतीयते।

**विरलः** वारं वारं मूर्च्छति, श्वसनेऽपि समस्या तस्याः।

**शान्ता** (शयिता सती शनैः) वत्स! किमिच्छसि खादितुम्? तद्ब्रूहि शीघ्रम्।

**वैद्यः** (परीक्ष्य) उक्तमासीत् कोरोनेति। तन्न श्रुतं नाचरितं च मे निदर्शनम्।

**धीरजः** किन्तु वैद्यवर! अहं तावत् कार्यालये ...

**वैद्यः** पत्नी कोरोनाग्रस्ता त्वं च पुनः कार्यालयं चिन्तयसीति न युज्यते त्वय्येतत्। को नामास्याः सहायार्थं तिष्ठेत् पतिं पुत्रं वा विना?

**विरलः** मम तु परीक्षा ...

**वैद्यः** सम्प्रत्यारब्धा। मातरं प्रति ते निष्ठायाः परीक्षा। तव च पुनः पत्नीं प्रति। यावदेषा सम्पूर्णतया स्वस्था भवेत्, कुरुतं गृहकार्याणि।

**धीरजविरलौ** एवमस्तु।

(वैद्यो निष्क्रान्तः)

(मञ्चेऽन्धकारः, सर्वे निष्क्रान्ताः, नेपथ्ये)

**दिवसा विंशतिर्याताः शान्ता स्वस्था मनस्विनी।**
**स्वस्थौ च तौ यथाकालं कालः सर्वस्य भेषजम्॥१४॥**

(ततः प्रविशति स्वस्था शान्ता)

**शान्ता** विरल! उत्तिष्ठ वत्स! उदितो भुवनभास्करो भगवान्। (शय्यामवलोक्य) कथमुत्तिष्ठ एव? क्व नु खलु गतः स्यात्? (अन्यत्रावलोक्य) वत्स! कथं स्नातस्त्वम्। सिद्धश्च परीक्षायै पाठशालां गन्तुम्?

(ततः प्रविशति पात्रहस्तो विरलः)

**विरलः** अम्ब! सिद्धोऽहम्। तुभ्यं च प्रातराशो मया पक्वः। आस्वादय तावत्।

**शान्ता** (सहर्षम्) चिरञ्जीव वत्स!

(ततः प्रविशति धीरजः)

**धीरजः** शान्ते! गच्छामि कार्यालयम्। सर्वाणि वस्तूनि स्वीकृतानि, प्रातराशश्च सम्पादितः। त्वया पुनर्यथासमयं भोजनं सम्पाद्यौषधञ्च स्वीकृत्य विश्रामो विधेयः।

**शान्ता** (प्रसन्ना सत्यात्मगतम्)

**विरलस्सरलो जातोधीरजे धैर्यमागतम्।**
**सत्यं शान्ता प्राप्तशान्तिः?स्वप्नो वा दृश्यते मया? ॥१५॥**

(प्रकाशम्) परिवर्तनकारणं समयं वन्दे। न ह्येषा कोरोना, एषा खलु करुणा गृहिणीषु। अनया प्रत्येकं कुटुम्बिनी रात्रिन्दिवं स्वधर्म इति गृहकार्यरता विश्रान्ता दिष्ट्या। अनया क्रीडालग्नैकमनाः पुत्रः संयोजितो मातृसाहाय्ये। अनया कार्यालयैकचित्तो भर्त्तोपदिष्टः। अनया कुशलावमू गृहकार्येषु। किमधुना याच्यतेऽधिकम् -

**॥भरतवाक्यम्॥**

**सर्वा गृहिण्यस्सुखिता भवन्तु**
**शान्तिं लभन्तां निजबन्धुवर्गे।**
**न क्वापि भर्त्तुर्धृतिहीनता स्याद्**
**दाम्पत्त्यमीयात् सरलस्वभावम्॥१६॥**

*****

# ॥ गृहभारम् ॥[1]

**श्री ऋषभः देरासरी[2]**

## पात्राणि

१ **सूत्रधारः**

२ **भृत्यः**

३ **गृहदासः**

४ **प्रियंवदा –** गृहदासस्य पत्नी

५ **रोहितः -** गृहदासस्य पुत्रः

## मङ्गलाचरणम्

**पयोधिकृतपादार्द्रं ब्रह्माण्डव्यापितध्वजम्।**
**हृद्ज्ञानोद्गमयन्तं तं सोमनाथं नुमो वयम् ॥१ ॥**

(नेपथ्ये)

भो भो! आज्ञापयतु भट्टिनीं समागतो वर्तते गृहस्वामी।

**गृहदासो गृहस्थस्य समस्याशोषिताननः।**
**प्रविष्टोऽस्तिवदामीति भृत्योऽहं भट्टिनीं पुनः ॥२ ॥**

**सूत्रधारः** भवतु आज्ञापयामि।

**भृत्यः** (स्वामिनं दृष्ट्वा) प्रतिदिनमिव अद्यापि विशेषतः समुद्दीपितशोक इव स्वात्मानं दर्शयन् इत एवाभिवर्तते स्वामिपादः। एषस्तु-

---

१ राष्ट्रिय-संस्कृत-एकाङ्किरचनास्पर्धायां तृतीयपुरस्कारेण सभाजितं रूपकम्

२ शोधच्छात्रः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

**गृहपतिरपि नित्यं नोपभोक्तुं समर्थो**
**गृहगतसमसौख्यं गेहदासायतेऽसौ।**
**तरुमिव निजछायानानुभूतप्रभावं**
**निजशरणगतोष्णोन्मूलने दासभूतम्॥३॥**

(ततः प्रविशति गृहचिन्तामापन्नो गृहस्वामी गृहदासः)

**गृहदासः** आः कष्टम्। प्रतिदिनमाजीविकायै इतस्ततः भ्रमणं कृत्वा कृत्वा बहुदूयते मानसम्। किमिदं विधात्रा निर्मितं न तत्र वैचित्र्यमाकलितम्।इह जगति सर्वेषामपि जनानामाजीविकायोगः एकस्मिन्नैव स्थाने कल्पितोऽस्ति विधात्रा। अयं तु दोषः। यतो हि-

**रात्रौ सूर्यो दिवा चन्द्रो न कृतो मधुरोऽदधिः।**
**तत्रापि जीविकायोगस्थानानैक्यं न निर्मितम्॥४॥**

यदि जीविने बहुविधा जीविकायोगोपायाः भवन्ति चेद्वरम्। इदं कि तर्हि एका एव दाराः स एव सुतः एतदेव गृहम् प्रतिदिनमेकस्मिन्नैव स्थाने कार्यं कृत्वा कृत्वा आलस्यमापन्नः। सर्वं भिन्नं स्याद् चेत् जीवने आनन्दः आगच्छति।

(इति कृत्वा गृहं प्रविशति)

**प्रियंवदा** (स्वपतिं विलोक्य) आगतम् तत्र भवता।आगच्छतु इदमस्ति चायम् अल्पाहारसहितं सज्जीकृतम्। तेन आस्वाद्यतां तावत् अल्पाहारानन्दः।

**गृहदासः** अतीव शोभनम्। भवत्या तु अल्पहारस्य निर्माणमपि भोजनमिव कृतमस्ति। बह्व्यः सामग्र्यः रचिताः। एतेनैव कर्मणा सर्वोऽपि गृहस्थः बद्ध्यते। तेन ममाऽपि नाम

सार्थकं जातम् गृहदास इति। अहमपि भवत्या एतेन बहुमानेन गृहदास एव कृतः।

**प्रियंवदा** एवं न वक्तव्यम्। एतन्मदीयं कर्तव्यम्।

**गृहदासः** (विहस्य) वेद्मि। किन्तु भवत्या एतैर्बहुमानैरहं कदापि गृहसमस्याभ्यो न मोक्षं प्राप्स्यामि। गृहस्थानामपिसमस्यास्तु भवन्त्येव खलु पश्य-

**विद्युतो शिशुशालायाः दुरवाण्याः गृहस्य च।**
**गृहस्थैः पुरणीयं तच्छुल्कं नित्यमतन्द्रया॥५॥**

**प्रियंवदा** सर्वं सम्यग्भविष्यति। चिन्ता मास्तु भगवान् सोमनाथः सर्वं सम्पादयिष्यति। अतः भगवान् सोमनाथोऽनुसन्धेयः।

**न प्रापयत्यभिभवं हृदये विषं तत्**
**कण्ठस्थितं विगतसत्वमहो हरस्य।**
**तद्वद्विपत्तिगणमेव सदाऽस्ति दुष्टं**
**हीनं दशांसवलमेव हि ते विषस्य॥६॥**

(ततः प्रविशति चाकलेहहस्तः गृहदासपुत्रः रोहितः)

**रोहितः** पितः पितः! मम मित्रस्य सविधे नूतनं क्रीडनीयकमागतमस्ति। तदेव इच्छामि अहमपि।

**गृहदासः** (सस्मितम्) अवश्यं पुत्र!अहं भवते दास्यामि। भोः तावदन्यत्र गत्वा क्रीडतु।

(शोकावस्थां नाटयन्) किं करवाणि ?

**इच्छास्सन्तोषतां नित्यं गच्छेयुश्चशिशोस्सदा।**
**पितरौ वाञ्छतस्स्वीयं जीवनं यापयन् मुदा॥७॥**

**प्रियंवदा** (गृहदासं दृष्ट्वा) अयि भोः। किमर्थं चिन्तामापन्नः ? किं जातम् ?

**गृहदासः** किमपि न। सः नूतनं क्रीडनीयकं याचितवान् अतः तस्य कृते धनव्यवस्था कुतः भविष्यति ? इति चिन्तयामि। सत्यमेवोक्तं शास्त्रकृद्भिर्यत् धनमेव पुरुषमित्रमस्तीति। अतः अहन्तु तथा धनमाहात्म्यं मन्ये। यत्-

**धनं ब्रह्मा धनं विष्णुर्धनंदेवो महेश्वरः।**
**धनं साक्षात् परंब्रह्म धनमेव वयं नुमः ॥८॥**

**प्रियंवदा** तत्र चिन्ता न कर्तव्या। सः तु बालकः सः धनव्यवस्थाविषये कथं जानीयात् ? अतः किमपि क्रीडनीयकं न दातव्यं तस्मै। एवञ्च तस्य क्रीडनीयकस्य कृते गृहसमस्यापूर्तये वा कुतश्चिदपि धनं नाहरणीयम्। यतो हि –

**सुखदं दुःखदं याति परेभ्यो याचितं धनम्।**
**बदरीफलवन्नित्यं कण्टकात् बदरीतरोः ॥९॥**

**गृहदासः** सत्यं वदसि। किन्तु किं करवाणि अहम् ? न मे मनः वालकमनोनोदने समुत्सहते।

**प्रियंवदा** न तत्र मनोनोदनमस्ति भवतः। सः अपरक्षणे विस्मरिष्यति क्रीडनीयकहठम्। अतः निश्चिन्तं भवतु।

**गृहदासः** (मस्तकन्यस्तहस्तो भूत्वा) अहं ज्ञातुमेव न शक्नोमि यत् जीवने कि प्रचलदस्ति ? कियदपि धनम् अहमर्जयामि तथापि गृहसमस्यानां समाधानमेव न भवति।

**प्रियंवदा** न तत्र भवतो दोषः। काल एव प्रभुः सर्वक्रिया-कलापानाम्। कालः एव सर्वं सम्पादयति। यतो हि-

**कालः करोति कार्याणि वयं न सहभागिनः।**
**पश्य वर्षातपौ शैत्यं कालाधीनं न संशयः ॥१०॥**

**गृहदासः** भवत्याः एतैर्वचनैरहं न सन्तोषमनुभवामि। एषा केवलं वाक्पटुतैव भवत्याः।

**प्रियंवदा** एवं नास्ति। अहं सत्यमेव वदामि।

**गृहदासः** नैव तत्र कालः कारणम्। अपि तु वस्तुमूल्यवृद्धिरेव कारणम् सर्वविधदारिद्रतायाः। पश्य-

**मूल्यवृद्ध्याऽभवत्सर्वमावृत्तं जगतीतले।**
**गृहञ्च भोजनं वस्त्रं यातं बृद्धौषधं पुनः ॥११ ॥**

अपि च-

**तैलं घृतं ततोऽप्येषो वायुःप्राणप्रदः पुनः।**
**मूल्यवृद्ध्यान्तरं किञ्च जलं मूल्यान्तरं गतम् ॥१२ ॥**

**प्रियंवदा** अस्त्युपायः सर्वसमस्यानां मानवमानसे। अतः विचार्य कार्यं करणीयम्। न सेवनीयं शैथिल्यमात्मना भवता। भविष्यन्त्युपायाः मूल्यवृद्ध्योन्मूलने।

**गृहदासः** एतस्याः उपायस्तु नैव शास्त्रकृद्भिरपि निश्चितः। नास्त्युपायो मूल्यवृद्ध्योपशमनस्य। एषा तु-

**राजयक्ष्मासमानाऽस्ति मूल्यवृद्धिर्जनेजने।**
**न नष्टा नाशयत्येव जनञ्चाविभत्यमुम् ॥१३ ॥**

अतः अहं तु बहुकष्टमनुभवामि। यथासामर्थ्यं प्रयत्नं कुर्वे तथापि मूल्यवृद्धिकारणात् गृहस्य समस्यानां पूर्त्तिरेव न भवति। किं वहुनाऽतिप्रयत्नेनापि मासान्ते न्युनीभवति धनम्। बलवत्या मूल्यवृद्ध्या स्वात्मानमेव दुर्वलं निरर्थकञ्च मन्ये। यतो हि –

**प्रस्तरो निष्ठुरोवापि तुलायां युज्यते सदा।**
**न मेऽस्ति क्वापि संयोगः प्रस्तरोमेऽतिरिच्यते ॥१४ ॥**

**प्रियंवदा**　एवं न विचारणीयम्। पश्यतु एतस्याः मूल्यवृद्धेः शमनोपायः अस्ति मम सविधे। सबलमेवौषधं निराकरोति रोगम्। अतः-

**मूल्वृद्धिविनाशाय धनवृद्धिर्वलीयसी।**
**सबलं ह्यौषधं रोगं नाशयत्येव मूलतः॥१५॥**

अतः आवाभ्यां तथा चिन्तनीयम् यथा गृहे धनवृद्धिः स्यात्। तथा यतनीयमावाभ्यामिति।

**गृहदासः**　(सक्रोधम्)धनवृद्धिः ? कथं धनवृद्धिर्भविष्यति ? अहं किमपि नावगच्छामि। किं वक्तुकामासि ?

**प्रियंवदा**　पश्य मम सविधे एकः उपायः अस्ति।

**गृहदासः**　कोऽस्ति उपायः ?

**प्रियंवदा**　श्रृणोतु यदि आवां द्वावपि धनार्जनं कुर्वश्चेत् धनवृद्धिर्भविष्यति। एवञ्च मूल्यवृद्धेः प्रश्नो हि न भविष्यति। जीवनं सुचारुं च चलिष्यति। अतः अयमेवोपायोऽस्ति मूल्यवृद्धिविनाशाय। यतो हि-

**समानचक्रसंयोगात् यानं सुष्ठु चलत्यथ।**
**धनार्जने च नौयोगो जीवनं चालयिष्यति॥१६॥**

**गृहदासः**　किन्तु भवति कथं साहाय्यं करिष्यति धनार्जने ? भवति तु केवलं गृहकर्मैव जानाति अन्या काचित् योग्यताऽपि नास्ति।

**प्रियंवदा**　भोः एवं मा वद। अहमपि आचार्यपदवीं दधे। अतः अहमपि आजिवीकाप्राप्तये सक्षमाऽस्मि। निश्चितं कुत्रचिदहमाजीविकां सम्प्राप्स्यामि।

**गृहदासः**　आम् सत्यमुक्तं भवत्या। भवती अपि धनार्जने साहाय्यं कर्तुं समर्था खलु किन्तु गृहकर्मणि भङ्गो भविष्यति चेत्

?गृहकर्मणि कार्यालयकर्मणि उभयत्र कथं भवत्याः संयोगो भविष्यति ?

**प्रियंवदा** एवं न विचारणीयम्। स्त्रीणाम् एषा एव कुशलता यत् स्त्रीयः बहुषु कार्येषु संलग्नाः भवितुमर्हन्ति स्वबुद्ध्या। स्त्रीणान्तु सहजमस्त्येतत्पटुत्वं सर्वकार्येषु। इदानीन्तने समाजे बह्व्यः तादृश्यः स्त्रीयः सन्ति याः गृहकर्म एवं कार्यालयकर्म उभयमपि सुष्ठुकुर्वन्ति। एवञ्च-

**गृहकार्यालयस्थं यत् कर्मकर्तुमपेक्षते।**
**पटुता सा विधात्रा तु स्त्रीभ्यो दत्ता न संशयः॥१७॥**

**गृहदासः** उत्तमम्। सत्यमेवोक्तं भवत्या। भवत्यां पटुता अस्ति एव न संशयः। भवत्या उत्तमविचारः प्रदत्ताः। एतेन गृहस्य सर्वसमस्यानां निराकरणं ध्रुवमेवभविष्यति। धनार्जने आवयोः योगः मूल्यवृद्धिं विनश्येदिति भगवन्तं सोमनाथं प्रार्थये। अथ च आशसे यत्-

**विद्युतो दण्डदीपस्य योगोऽपाकुरुते तमः।**
**धनार्जने हि नौयोगो जीवनस्थमपाक्रियात्॥१८॥**

(इति निष्क्रान्तो दम्पती)

*****

## ॥ व्युत्क्रमम् ॥

**डॉ.अमृतलालः भोगायता[1]**

**(एकं दृश्यम्)**

**रामेश्वरो राममनोभिरामो**

**दशाननस्यापि दृशां विरामः।**

**सखा सखीनां द्विषतां समेषां**

**स पातु सेतुं हृदयोर्मिसृष्टम् ॥१ ॥**

नेपथ्ये मन्त्रगानम्

**ॐ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**

**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥**

(ततः द्वौ रामविरामाख्यौ वयस्यौ

प्राथमिकविद्यालयस्य प्राङ्गणे प्रविशतः)

**स्थलम्-रशियादेशः**

**रामः** अयि विराम! विरम, विरम, रामोऽत्र बहुकालात् त्वां परिपालयन् स्थितः।

**विरामः** अयि राम! त्वमत्रैव स्थितो विचारविद्धेन मया कथं न लक्षितः? अस्तु **जय श्रीराम**।

**रामः** सखे! जीवने आदौ रामस्य भक्तिः ततो जयस्ततश्च श्रीरिति, अतः अहं तु **"रामजयश्रीः"** इति व्युत्क्रममेव वक्ष्यामि...

**विरामः** भवतु क्रमो व्युत्क्रमो वा **"मधुराधिपतेरखिल मधुरम्"** इति न्यायेन नाम्न एव महिमा।

---

१ प्रधानाचार्यः, ब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियाद, गुजरातम्

**रामः** कथय, स्वाध्यायो वर्धते? गृहे क्षेमं समेषाम्? आत्मा प्रसन्नः?

**विरामः** सर्वमपि समीचीनं तथापि मनः उत्कण्ठितमेव स्थैर्यं न भजति। यथा कविना कालिदासेन शाकुन्तले उक्तं तद्भावोऽत्र स्मर्यते।

**दृश्यं दृश्यं विलोक्यापि श्लोकं श्रुत्वा मनोहरम्।**
**मानसं रमते नो चेन्मनः खिन्नं न संशयः ॥२॥**[२]

पद्यमिदमद्य चरितार्थमिवानुभूयते। वयमद्य देशमेनं विहाय अन्यं देशं यास्याम इति पित्रा निवेदितम्। आकस्मिकं दूरगमनं तत्रापि चायं त्वद्विरहो मां दुःखाकरोति।

**रामः** एतच्छ्रुत्वा ममापि मनो दूयते परन्तु महाकवेः भवभूतेः पद्यभावं सन्निहिते विरहेऽपि स्वस्थ एवास्मि।

**नादिदूरेऽथवा दूरेऽथवा स्नेहोऽखण्डो विराजते।**
**पूषा पुष्णाति पद्मानि स्वयं सन्नम्बरे स्थितः ॥३॥**[३]

**विरामः** उभावपि नमस्यौ कविवरौ

**श्रीकालिदासस्य गिरं स्मरामि**
**तेनैव सार्धं भवभूतिवाक्यम्।**
**उभौ कवी मे हृदये वसन्तौ**
**यथा वसन्ते सुरभिर्वनेषु ॥४॥**

---

२ सन्दर्भः- शाकुन्तलस्थं पद्यम्

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि॥

३ उत्तररामचरितस्थं पद्यम्

व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः॥

अस्माकं काव्येषु कविभिः सर्वासामपि परिस्थितीनां समाधानानि प्रदत्तानि सन्ति, एतानि अस्मभ्यमात्मबलं ददति विपरीतायां स्थितौ प्रेरणां यच्छन्ति।

**रामः** त्वं कुत्रापि गच्छेः अहं त्वया सह अद्वैतभावमाश्रित आयास्याम्येव, आवयोर्मध्ये स्नेहसेतुस्तथाविधो दृढो वर्तते तत्र देशकालसामर्थ्यमपि पराजितमेवेति मन्ये सूर्यकमलवत्, चन्द्रचन्द्रकान्तमणिवत्, निशाकर-नीरधिवत्, रामविरामयोरपि जगदिदं निदर्शनं दास्यति। एतद् यथार्थं कर्तुं पुनः साक्षादेवमेव मेलनं स्यान्न यन्त्रेणापि सम्पर्के न भवावः।

**विरामः** मित्र! घनमालिङ्गनं देहि, पुनः कदा कुत्र योगः स्यादिति तु जगदीश एव जानाति। यद्यपि त्वं तु मयि सुमे सुरभिरिव, देहे प्राणा इव, तरावौषधमिव, सागरे लावण्यमिव मयि नितरां स्थितः, स्थास्यति च। जय श्री राम।

**रामः** रामजयश्रीः।

**(द्वितीयं दृश्यम्)**

(विरामस्य युक्रेनदेशे अध्ययनान्ते दूरदर्शने कार्यारम्भः स नितरां पौनः पुण्येन सखायं स्मरति परन्तु साक्षादेव योग इति न यन्त्राश्रितः इति वाक्यं तं सम्पर्काद् रुणद्धि।)

**विरामः** (आत्मगतम्)

**माता पिता मे हृदयस्थदेवौ**
**देशस्तथायं मम जीवितार्थः।**
**परं प्रशस्यो भुवि मे वयस्यो**
**न रामसंज्ञः स्मरणात् प्रयाति ॥५॥**

**सम्बन्धबन्धास्तु भवन्ति नैके**
**दार्ढ्यं परं मित्रभवे भवेऽस्मिन्।**
**मया विरामेण कथं विरामः**
**स्मृतेर्विधातव्य इति प्रभो मे॥६॥**

अहो! सर्वेऽपि कार्यकरा आगता इति सर्वान् स्वकर्मणि योजयामि... इति याति।

**(तृतीयं दृश्यम्)**

(रशियादेशे रामाख्यो बालः सन्निष्ठो देशभक्तः सन् सेनायां सैनिकोऽभवत्। गच्छता कालेन स सेनानायकोऽप्यभवत्।)

**रामः** (आत्मगतम्)

**देशोऽस्ति देवः प्रथमो मदीयः**
**श्रद्धा च पित्रोः परमा पवित्रा।**
**तथापि रामस्य विरामहेतुः**
**सखा विरामः स्मृतिसृष्टिसंस्थः॥७॥**
**तद्बाल्यसख्यं सततं स्मरामि**
**सोऽपि स्मरेद्वेति परं न जाने।**
**दिक्कालनिर्बाधयुतेऽत्र भावे**
**कदाप्यभावो न भवेन्मतं मे॥८॥**

अहो सर्वेऽपि सैनिका आगताः, सर्वान् स्वनियोगे नियोजयामि।

**(चतुर्थं दृश्यम्)**

(नेपथ्ये) कोलाहलः, सपदि रशिया-युक्रेनदेशयोर्युद्धं प्रवृत्तम्, शस्त्रास्त्राणां ध्वनयः श्रूयन्ते, लोकानां क्रन्दनम्, पशूनामितस्ततो धावनम्, सर्वत्र चित्कारः, भयम्, शोकः, आर्तनादः क्षणादेव वसन्तर्तौ शिशिर इव आगतः, कर्मभूमिः कुरुक्षेत्रमिवादृश्यत। सर्वत्र यथार्थरूपेण

विद्युच्चलमेव जीवितम्, रक्तेऽनुरक्ता एव मानवा दृश्यन्ते, शौर्यं च क्रौर्यं सर्वत्र व्याप्तम्, कारुण्यं भवभूतिरेव न परन्तु युद्धमपि तनुते। दयनीया दीनानां दशा। विलोक्यां विलोक्यतां युद्धस्य परिणामः। ईदृश्यां भयावहायां परिस्थितावपि कश्चन युवा हुतात्मा सन् मानवानां रक्षणे रतः। दृश्यतामयं वीरः सैनिकः।

**एका वृद्धा-**

**हे पुत्र! सुप्तोऽसि कथं पृथिव्यां**
**वार्धक्यदण्डोऽसि धृतिर्मदीया।**
**ममास्ति कालो गमनस्य लोका-**
**दादौ प्रवृत्तोऽसि कथं विहाय॥९॥**

**सैनिकः** मातः! मृतं सुतं त्यक्त्वा तत्र याहि येन ते सुरक्षा स्यात्।

**एका युवती-**

**श्रान्तोऽसि किं कान्त! भुवि प्रसुप्तः**
**क्षणं प्रबुद्धो भव भार्ययोक्तः।**
**विना त्वयाहं वद जीविता स्या-**
**मेकाकिनी ते प्रियचक्रवाकी॥१०॥**

**सैनिकः** भगिनि! शान्ता भव, सर्वत्र सर्वान् विलोक्य आत्मानं धारय, तत्र गच्छ सुरक्षिता भव, याहि।

**एको युवा-**

**मौनं प्रिये मानिनि मुञ्च मुञ्च**
**किञ्चित्प्रियं स्याद् वद वाऽप्रियं स्यात्।**
**श्रोतुं मदीयौ श्रवणौ सतर्षौ**
**मधुप्रसिक्तौ कुरु मुग्धकन्ये!॥११॥**

**सैनिकः** भ्रातः! शोकं संयम्य मरणोत्तरं विधेहि याहि, तत्र सुरक्षितो भव।

**एका भगिनी-** (मृतं लघुभ्रातरं विलोक्य)

**वक्ष्यामि किं नौ पितरौ वद त्वं**
**गत्वा गृहं त्वामिह वर्तमानम्।**
**भ्रातर्भगिनी परकीयसम्पत्**
**त्वमेव तातस्य भवाब्धिपोतः॥१२॥**

**सैनिकः** भगिनि! यावदियं दृष्टिः द्रष्टुं शक्ता तावदत्र विलोकय, सर्वत्र समानमेव दुःखं लवणार्णवे लवणमिव सर्वत्र व्याप्तं वर्तते। धृतिं रक्ष, तत्र गच्छ, आत्मानमवेति प्रार्थय अहमपि ते भ्रातैवास्मि।

**एकः शिष्यः** गुरो जागृहि, गुरो जागृहि, पश्य, ते अन्तेवासी त्वामुपगतः।

**सूर्येण चन्द्रेण न दीपकेन**
**प्रकाशलब्धिर्मम जीवितेऽत्र।**
**सर्वत्र लोके प्रसृतोऽन्धकारो**
**गुरौ गते कुत्र गतिर्मदीया॥१३॥**

**सैनिकः** भ्रातः! अत्र युद्धक्षेत्रे सर्वैः कश्चित् स्वजनो हुतः, आत्मानः कल्याणं विचिन्त्य दूरं याहि, तत्र सुरक्षागृह एव तिष्ठ।

**सैनिकः** पयोधरपानं कुर्वन्तं बालं विलोक्य-

**स्तनन्धयः क्रन्दति बालकोऽयं**
**माता मृता सेति न वेत्ति मन्दः।**
**दिवं प्रयाताऽपि ददाति दुग्धं**
**पाने रतोऽयं विरतः कथं स्यात्॥१४॥**

अहो दुःखम्! आकृष्य अन्यत्र सुरक्षितं करोमि।

**एकः पिता** (मृतं पुत्रं विलोक्य कथयति) जात! त्वां विना अस्माकं किं भविष्यति, त्वं तु जीवनाधारोऽसि नः, कष्टं सोढ्वा वर्धितः, पाठितः, विवाहयोग्यतां नीतः परन्तु विधात्रा स्वर्गं नीतः। सर्वेऽपि स्वप्नास्त्वया सहैव सुप्ताः, उत्तिष्ठ, एतावत्कालपर्यन्तं त्वया मे वाक्यपालनं कृतं किमधुना न करोषि?

**मया न दृष्टः श्रवणः श्रुतश्च**
**गोकर्णनामा पठितः कथायाम्।**
**त्वमेव रामो मम पुत्र तात**
**त्वं मेरुदण्डोऽसि कथं चलामि ॥१५॥**

**सैनिकः** तात! नायं शोकस्य कालः, धैर्यं रक्ष, स्वात्मरक्षणं विचिन्त्य कृपया तत्र याहि।

(एवं सर्वान् प्रबोधयन्तं रक्षन्तं सेवमानं सैनिकं कश्चिद् युवा भुशुण्डिमुखेन रुणद्धि।)

**रशियनयुवा** अयि वीर! तिष्ठ मया त्वं बन्दीकृतः।

**युक्रेनसैनिकः** नाहं त्वत्तो बिभेमि, त्वया बन्दीकृतोऽपि स्वधर्मच्युतो न भवेयम्। त्वं भारतीय इव भासि, अहमपि भारतीय एवास्मि **"स्वधर्मे निधनं श्रेयः"** इति रक्तेऽनुरक्तं वचः। शौर्यस्य शौर्येण, क्रौर्यस्य क्रौर्येण प्रत्युत्तरं दातुं बन्दीकृतोऽपि क्षमः।

**रशियनयुवा** भारतीयतां पुरस्कृत्य स्वात्मरक्षणाय यतसे? परन्तु यस्य देशस्य अन्नेन जलेन जीवामि तत्रैव निष्ठाबद्धो भवामि। नात्र वञ्चनावकाशः।

**युक्रेनसैनिकः** प्रियं प्रियं प्रोक्तम्। त्वया स्वदेशस्य भारतभूमेश्च गौरवं वर्धितम्। गौरवाय गौरवाय ते वचः, वीर! चिरं जीव।

**रशियनयुवा** तव प्रशंसायाः न कश्चित् प्रभावो भविष्यति, चाटूक्तिचातुरी मया अवगम्यत एव।

**युक्रेनसैनिकः** मान्यवर! तव शौर्येण प्रसन्नोऽहं **"शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि"** इति मद्गुरोर्वाक्यमेव परिपालयामि। येषां प्राणाः अतिप्रिया भवन्ति, ते युद्धे न प्रवर्तन्ते। नाहं सैनिकः परन्तु देशस्थितिं विचिन्त्य दूरदर्शने कार्यरतोऽपि तत्कर्म विहाय **"कार्यं वा साधयामि देहं वा पातयामि"** इति मनसा दृढं संचिन्त्यागतोऽस्मि।

**रणक्षणे मे निकटं स्थितेऽपि**
**ज्ञातं भयं नो मनसाऽपि किञ्चित्।**
**आयाति मृत्युर्मरणोत्सवो मे**
**पश्चात् पदं नैव कदापि कुर्वे॥१६॥**

**रशियनयुवा** (उच्चैर्हसति) अयि त्वं तु दूरदर्शनस्यैकः कलाकारः अभिनेता पत्रवाचकः वा शस्त्रास्त्रध्वनिभिरेव तव तु दूरदर्शनमेव स्यात्। **"युद्धस्य वार्ता रम्या"** इति श्रुतं तदद्यानुभूतं स्यात्।

**नाट्य नटन्तोऽरिगणेऽप्यटन्तो**
**विलोकिताश्चित्रविचित्रवेशाः।**
**यथार्थयुद्धेऽभिनयः फलेन्न**
**त्वं नासि योद्धेति विमुक्तिरेषा॥१७॥**

याहि मया त्वं दयया विमुक्तः, परं पुनः जीविताशा चेत्दूरदर्शने एवं दर्शनं न तु प्रत्यक्षं भव!

**युक्रेनसैनिकः** अस्माकं तु देवोऽपि नटवरः कृष्णः कुरुक्षेत्रं जयति, नटराजश्च ताण्डवं तनोति, तस्मान्नटत्वं तु गौरवाय नः।

**दयार्द्रभावेन विमुक्तिरेषा**
**न जीवनं भैक्ष्यगुणेन लब्धम्।**
**गृहाण शस्त्रं कुरु जीवनान्तं**
**स्वर्गे प्रतीक्षां कुरुतेऽप्सरा मे ॥१८॥**

**"जय श्रीराम"** घातं कुरु।

**रशियनयुवा** भ्रातः! **"रामजयश्रीः"** इति वद व्युत्क्रमो मे रोचते, आदौ रामः भवति, ततः तत्कृपया जयो भवति, ततश्च श्रीः...

आकर्ण्य वाक्यमिदं विधेरपि व्युत्क्रमं विलोक्य जातपरिचयौ उभावपि साश्रुलोचनौ परस्परं पश्यतः।

**सर्वे गायन्ति**- भरतवाक्यम्

**परस्परं भावयुता भवेम**
**म्रीयेत मैत्री न कदापि भूमौ।**
**स्नेहेन सिक्ता मनुजा भवन्तु**
**युद्धैर्विहीनं जगदेतदास्ताम् ॥१९॥**

*****

# ॥ दीपोत्सर्गः ॥

**डॉ.शैलेश कुमार मिश्रः**[1]

**स्त्रीपात्राणि**

| | | |
|---|---|---|
| १ | **कर्णावती** | चित्तौडराज्यस्य राजमहिषी, राणासांगामहाराजस्य विधवा |
| २ | **पन्ना** | कर्णावतीसुतस्य उदयसिंहस्य धात्री |
| ३ | **वृन्दा** | कर्णावत्याः सेविका |

**पुरुषपात्राणि**

| | | |
|---|---|---|
| ४ | **बनवीरः** | राणासांगामहाराजस्य विद्रोही भ्रातृजः |
| ५ | **राणा उदयसिंहः** | राणासांगाकर्णावत्योः कनिष्ठः सुतः, चित्तौड़राज्यस्य युवराजः |
| ६ | **चन्दनः** | पन्नायाः तनयः |
| ७ | **धनेशः** | कर्णावत्याः सेवकः |

**समयः**

**षोडशशताब्द्याः पूर्वार्द्धः**

## प्रथमं दृश्यम्

(स्थानम् - चित्तौडराज्ये राणासांगामहाराजस्य राजप्रासादः)

**उदयसिंहः** धात्रि मातः! क्रीडितुं बहिर्गच्छेयम्? न मे मनोऽत्र रमते। अत्राभ्यन्तरे स्थित्वा श्वासावरोध इव प्रतीयते।

---

१ सहायकाचार्यः, राजकीयसंस्कृतमहाविद्यालयः, राँची, छत्तीसगढ़

**पन्ना** नहि नहि युवराज! प्रासादात् बहिर्नतु विषाक्तो वायुर्वहति। प्राणापहारिणः उत्फणाः विषधराः बहिः भ्रमन्ति।

**उदयसिंहः** धात्रिमातः! नावगम्यते ते वार्ता। यदि कुत्रचिद् विषधराः सन्ति चेद् हन्यन्ताम्। तीक्ष्णाऽसिधारयाऽहं तान् विषमुद्वमतः विषधरान् एकेनैव प्रहारेण खण्डयिष्यामि। अनुजानीहि माम्।

**पन्ना** अहो मम युवराज! स्यादेवं कदाचिन्नाम। भवान् गच्छतु चन्दनेन सह क्रीडतु। सोऽप्यत्र प्रासादाभ्यन्तरे एव स्यात्।

(चन्दन! चन्दन! इत्याकारयन् निष्क्रान्तः उदयसिंहः)

**पन्ना** **(स्वगतम्)** हा! कीदृशः मुग्धोऽयं बालः सिसोदियावंशावतंसः, कीदृशी च निर्दया कालगतिः!

(ततः प्रविशति धावन्ती उच्छवसन्ती कर्णावती)

**कर्णावती** पन्ने! पन्ने! क्वासि मे सखि!

**पन्ना** महाराज्ञि! इयमस्मि। केयं वार्ता? चित्तौड़राज्यस्य राजमहिषी एतादृशी भयभीता नावलोकिता मया पुरा।

**कर्णावती** आम्, सत्यं भणसि मे सखि! भयाद् भृशं प्रकम्पते मे हृदयम्।

**पन्ना** कथ्यताम् तावत्। कोऽत्र राजमहिष्याः भयहेतुः।

**कर्णावती** पन्ने! अरक्षितः खलु चित्तौड़स्य राजदुर्गः स्वकीयं भाविनं नृपं रक्षितुं नार्हः। सिसोदियाराजवंशस्य प्रदीपोऽयं झञ्झानिलाऽऽक्रान्तो वर्तते। अत्याचारिणो बनवीरस्य क्रौर्यं दिनानुदिनं वर्धत एव। अद्य सः राणाविक्रमं हतवान्। हा! किं करवाणि!

**पन्ना** किम्? राणाविक्रमादित्यो दिवङ्गतः? हा परमात्मन् क्वासि! त्राहि त्राहि! चित्तौड़धरा लुठितादुर्दशामवाप्ता। हा दैव!

**कर्णावती** पन्ने! मम भगिनि! नायमवसरः अश्रुपातस्य। धीरा भव। सिसोदियाराजवंशस्य एकमात्रप्रदीपोऽयम् उदयसिंहः बनवीरस्य क्रूरताभाजनं भविष्यतीति शङ्कते मे हृदयम्। स खलु रक्षणीयः।

**पन्ना** (उच्चैः) नहि नहि! मैवं वदतु। जीविते मयि कः कुमारं क्रूरदृशा द्रष्टुं शक्ष्यति? एकमेकं क्रूरं लोचनं निष्कृष्य प्रक्षेप्स्यामीति मे द्रढीयसी प्रतिज्ञा।

**कर्णावती** पन्ने! जानामि ते स्नेहः। जाने तव समर्पणम्। त्वयि स्थिते युवराजस्य किमप्यमङ्गलं नकोऽपि कर्तुमर्ह इतिमे द्रढीयान् विश्वासः। ननु त्वत्स्तन्यपोषितः बालोऽयं उदयसिंहः। तवममत्वाऽऽपूरितोत्सङ्गात् अपहृत्य उदयसिंहं कश्चिद् हनिष्यति सोऽयं करवालः नैव निर्मितः।

**पन्ना** निश्चयेन देवि! धात्री माता अस्मि राणाजीवस्य। धात्री न केवलं पालयति रक्षितुमपि सम्यक् जानाति।

**कर्णावती** पन्ने! सिसोदियाराजकुलास्यान्तिमः प्रदीपोऽयं अन्या-यात्याचारझञ्झावातैः न निर्वापितः स्यात्।

**पन्ना** देवि! यावत् पन्नायाः स्वेहाञ्चलं सिसोदियाकुलदीपं रक्षति तावन् न कोऽपि विपद्वातः प्रदीपनिर्वापक्षमः।

**कर्णावती** पन्ने! चित्तौडस्य राजमहिषीयं स्वीयाञ्चलं प्रसार्य त्वां याचते इदानीम्। चित्तौडराज्यस्य प्रदीपमेनं

स्वस्नेहाञ्चलेन निगूह्य दुराचारिणाम् आक्रोश-झञ्झानिलाद् दूरं दूरतरं याहि।

**पन्ना** किमिदं भणति भवती? देवि! किमर्थं याचना? कीदृशी प्रार्थना? अत्रभवतीनामादेशः शिरसाधारयामि। कर्तव्यमिदं खल्वस्माकम्। सर्वस्वमपि स्वीयमुत्सृज्य राजवंशप्ररोहः मया रक्षणीयः। निजभगिन्यां विश्वसिहि।

**कर्णावती** सर्वस्वोत्सर्गतत्परे मे भगिनि! अपारशक्तिसञ्चारस्त्वयि स्यादिति परमेश्वरं प्रार्थये। न किञ्चिदप्यवसितं मम जीवने। लुण्ठकानामाततायिनां कुकृत्यकारिकर-स्पर्शनात् पूर्वमेव आत्मीयं देहमिमं ज्वलाद्वह्निज्वालासु समर्पयिष्यामि।

**पन्ना** हा देवि! हा महाराज्ञि! कीदृशो निर्ममोऽयं कालः!

**कर्णावती** शोकं जहीहि मे सखि! कालादेशः सर्वथा स्वीकरणीयः अस्माभिः। प्रयाणं करोति तवभगिनीयम्। अनुजानीहि माम्।

**पन्ना** हा मे प्राणप्रिये सखि! हा सिसोदियावंशावतंसे! हा चित्तौड़प्रतिष्ठाविवर्धिनि!

(निष्क्रान्ता कर्णावती)

(ततः प्रविशति वृन्दा)

**वृन्दा** धात्रि मातः! धात्रि मातः! श्रुतं त्वया?

**पन्ना** किम्?

**वृन्दा** दुराचारिणा बनवीरेणेदं प्रतिज्ञातं यदद्य स युवराजस्य प्राणान् अपहरिष्यति। कोऽयं कालःआपतितः धात्रि मातः! किं भविष्यति?

**पन्ना** वृन्दे! ईश्वरच्छया विना कस्य मृत्युरागच्छति? ऋते ईश्वरं कः कालमधिकर्तुं क्षमः? मा बिभेहि। राजकुलदेवताः रक्षिष्यन्ति। गच्छ धनेशं प्रेषय। अत्र प्रासादप्राङ्गणस्य सम्मार्जनंकरणीयमस्ति।

**वृन्दा** यथादिशति धात्रि मातः!

(निष्क्रान्ता वृन्दा)

(ततः प्रविशति धनेशः)

**धनेशः** धात्रि मातः! किं भवती आहूतवती माम्?

**पन्ना** आम् धनेश! श्रृणु। सावधानं श्रृणु। अद्यतनी रजनी अतीव भयावहा। दुष्टबनवीरं शस्त्रैःप्रतिरोद्धुं न वयं क्षमाः। बुद्धिरेवास्माकम् एकमात्रमवलम्बनम्।

**धनेशः** सत्यं वदति भवती।

**पन्ना** तर्हि शुणु। अद्य रात्रौ भोजनानन्तरं त्वं उच्छिष्टसम्मार्जनार्थं बृहत् कण्डोलम् आनय। निद्रितं युवराजं तस्मिन् कण्डोले शाययित्वा तस्योपरि पत्रपात्राणि संस्थाप्य इतः राजप्रासादाद् दूरंयाहि। श्वस्तनेप्रभातेऽहं कुम्भलगढं निकषा त्वां मेलिष्यामि। धनेश! अद्य खलुचित्तौडराजवंशस्य रक्षा तव शिरसि एव स्थास्यति। राजवंशस्य आधमर्ण्यं धारयसि। तदिदानीम् अपाकरिष्यसि तद्दणं कच्चित्?

**धनेशः** निश्चयेन धात्रिमातः! निस्सन्दिग्धा भवतु भवती। युवराजं न कश्चिद् स्प्रष्टुमपि क्षमः स्यात्।

**पन्ना** सिद्धिर्भवतु ते। गच्छेदानीम्।

(निष्क्रान्तो धनेशः)

## द्वितीयं दृश्यम्

(स्थानम्- चित्तौडराजप्रासादः)

**चन्दनः** मातः! अयि मातः! कुमारः अद्यापि मम शय्यायामेव शेते। तामुत्थाप्य तस्य पर्यङ्के शायय। प्रतिदिनं स एवमेव करोति। अहं कुत्र स्वप्याम्?

**पन्ना** पुत्र! मा कोपं कुरु। शय्यया किं प्रयोजनम्? गच्छ त्वमद्य कुमारस्य पर्यङ्के स्वपिहि।

**चन्दनः** नहि मातः। अहं युवराजस्तु नास्मि तत्कथं तस्य पर्यङ्के स्वप्याम्?

**पन्ना** पुत्र! युवयोर्द्वयोर्मध्ये केयं भिन्नता? द्वावपि मे प्रियसुतौ। अद्य स खलु चन्दनो भूत्वा तवशय्यायां शेते तर्हि त्वं राजकुमारो भूत्वा तस्य पर्यङ्के स्वपिहि। आगच्छ राजोचितभूषणैः त्वांयुवराजं विधास्यामि।

(युवराजस्याभूषणैः पन्ना चन्दनं भूषयति)

**चन्दनः** **(आत्मानमवलोकयन्)** मातः! किमहं राजकुमार इव प्रतिभामि?

**पन्ना** अथ किम्? त्वं तु सर्वथा युवराज इव प्रतीयसे।

**चन्दनः** मातः! किं सत्यमेव आकृत्या सुन्दरः युवराज इवास्मि?

**पन्ना** अथ किम्? अद्य खलु तावकीना छविरियं दर्शं दर्शं न मे तृप्तिर्जायते।

(चक्षुष्कोणाद् गलदस्रंप्रोञ्छति पन्ना)

**चन्दनः** मातः! त्वं क्रन्दसि?

**पन्ना** नहि चन्दन! तवेयं राजच्छविं निर्वर्णयन्ती चिन्तयामि यत् ममापि पुत्रः राजा भवेत्। इतिहासे तस्य नाम अमृतत्वमाप्नुयात्।

**चन्दनः** मातः! तव सुतोऽयं राजा भवेद्वा न वा किन्तु निजपुण्यकर्मभिः तव नामोत्कर्षं निश्चयेन स्थापयिष्यति।

**पन्ना** अथ किम्? पुण्यकर्मणा चतुराशासु तव यशःप्रसारो भविष्यति इति मे दृढा मतिः। मम राजसुत! गहनायते रजनी। गच्छ शय्यायाम्।

**चन्दनः** मातः! त्वमपि स्वपिहि।

**पन्ना** कुतो निद्रा मम भागधेये! गच्छ त्वं शयनाय।

(चन्दनः उदयसिंहस्य पर्यङ्के शेते।
पन्ना अश्रूणि प्रोञ्छन्ती द्वारि तिष्ठति)

**पन्ना** (स्वगतम्) हा! विधे! अद्यतनी रजनी अतीव विकराला। हा! एकस्तु प्रदीपः अद्य निर्वापयिष्यते एव। द्वावपि मे स्तनन्धयौ तनयौ। हा! एतदेव द्रष्टुं जीवनं धारयामि? हा! एतत्पूर्वमेव कथं न विदीर्यते मम हृदयम्। नूनं हि वज्रसारमेव मे हृदयम्।

राजवंशस्य रक्षायै मया दीपोत्सर्गः विधेयः। मम कुलज्योतिः मम वंशदीपो मम हृत्खण्डः मम प्रियसुतः राजकुलस्य रक्षायज्ञे आत्माहुतिं प्रदास्यति। चित्तौडस्य धरा आहुतिमभिलषति। चन्दनस्याहुतिः मातृभूमेः रक्षणार्थम्। चन्दन! सत्यं त्वया भणितम्। निजपुण्यकर्मभिः आत्मोत्सर्गेण त्वममृतत्वं यास्यसि। हा! चन्दन! मम प्रियसुत! मम राजतनय!

(कण्डोलसहितः धनेशः प्रविशति)

**पन्ना** धनेश! आगतोऽसि? तत्र चन्दनस्य कक्षे युवराजः शयानो वर्तते।

(अङ्गुल्या निर्दिशति)

**धनेश** धात्रि मातः! अवगतं सर्वम्।

**पन्ना** तद्गच्छ कुरु निजकर्तव्यम्।

(धनेशः शयानम् उदयसिंहं कण्डोले स्वापयति,
तदुपरि च उच्छिष्टपत्रपात्राणि स्थापयति।
कण्डोलं शिरसि निधाय द्वारि आगच्छति)

**धनेशः** गच्छेयं धात्रि मातः!

**पन्ना** धनेश! अद्य सत्यं त्वं धनेश एवासि। चित्तौड़राजरत्नस्य रक्षाभारः त्वयि एव। लुण्ठकेभ्यः अमूल्यो निधिरेष त्वया रक्षितव्यः। यथा निर्दिष्टोऽसि तथा कुरु। त्वरस्व। विकरालः नन्वयं कालः। गच्छ शिवास्ते पन्थानः सन्तु। रक्षतु त्वां सदाशिवः।

(यावन्निष्क्रामति धनेशः तावदेव प्रविशति मदिरामत्तचित्तः
करवालहस्तः बनवीरः)

**बनवीरः** रे! कस्त्वमसि? अत्र किं करोषि? कण्डोले किमस्ति?

**धनेशः** अन्नदातः! अहमस्मि भवतो दासः धनेशः। उच्छिष्टपत्रपात्राणि कण्डोले नयामि स्वामिन्!

**बनवीरः** चल इतो दूरमपसर।

(कण्डोलमादाय धनेशः निष्क्रान्तः।बनवीरः अग्रे गच्छति)

**बनवीरः** हह ह ह! विक्रमनामा कण्टकोऽपसारितः, अद्य उदयोऽपि अस्तङ्गमिष्यति। चित्तौडराज्यासनस्य पथि विद्यमानान् सर्वानपि कण्टकान् असिनिशितधारया छेत्स्यामि। अद्य मार्गो मे निरापदो भविष्यति ह ह ह ह!

**पन्ना** (मन्दस्वरेण) अत्याचारिन्! पापिन्! प्राणापहारिन्! राजसिंहासनमभिलषसि। निजपापकर्मजनितज्वाल-

जालाऽऽहारो भविष्यसि। निर्दयहृदय! बधिक! रक्तपायिन्!

**बनवीरः** अरेरे! पन्ने! त्वया किमपि भणितं किम्?

**पन्ना** (उच्चैः) आमाम् रे दुराचारिन्! त्वं बधिकः पापी निर्दयो रक्तपायी असीति भणितं मया। किं करिष्यसि? आगच्छ शिरश्छेदं मे कुरु।

**बनवीरः** अरे! नहि पन्ने! मम करवालः तव रक्तं पातुं नेच्छति। उदयसिंहस्य शोणितधारया एव मम करवालतृषा शममेष्यति। (करवालाग्रभागेन पन्नायाः चिबुकम् उन्नमय्य) वद कुत्रास्ति मे मार्गकण्टकः? कुत्रास्ते मम रिपुः उदयसिंहः? शीघ्रं वद।

**पन्ना** बनवीर! अन्यायं मा कुरु। युवराजस्ते किमहितं करोति? मुञ्च मुग्धं बालमिमम्।

**बनवीरः** ह ह ह ह! अहितम् इदानीं न करोति पश्चात् करिष्यति पन्ने! मुग्धो बालो नैव एषः। सर्पशावकोऽस्ति ननु सर्पशावकः। यावत् सर्पशावकः प्राणधारी विषधरो जायेत तस्मात्पूर्वमेव तस्य फणो मर्दनीयः।

**पन्ना** बनवीर! कुलदेव्याः शपथेनानुभावयामि त्वाम्। आर्त्तत्राणाय भवन्ति राजशस्त्राणि न तुपीडनाय। किमर्थमात्मानं घोरे कर्मण्यस्मिन् नियोजयसि?

**बनवीरः** मुग्धा एवासि पन्ने! क्षुत्क्षामोदरः व्याघ्रः सम्मुखस्थस्य भक्ष्यस्य प्राणान् मुञ्चति किमु? कस्यापि शपथोऽद्य मम मार्गमवरोद्धुं न शक्नोति। रिपोः शिरः ऋते नान्यं किञ्चिदपि वाञ्छामि।

**पन्ना** बनवीर! धात्री माता अस्म्यहम् उदयसिंहस्य। सुतमिव तां बहुयत्नैर्पोषितवती अस्मि। कथं कोऽपि माता निजहृदयांशं प्रियतनयं मृत्यवे दास्यति? बनवीर! नतशिरसाऽहं याचे त्वाम्। मुञ्च एनं निश्छलम् अनागसं बालम्।

**बनवीरः** अहो! यत्नैः पोषितवती। ह ह ह ह! तर्हि इदानीं यत्नैः चितामप्यस्य अलङ्कुरुष्व। तस्य धात्री नन्वसि त्वम् ह ह ह ह! (उच्चैः) प्रलापिनि स्त्रि! मा मामुपदिश। पिपासार्दितो मम करवालो वर्तते। शीघ्रं कथय कुत्रास्ति उदयसिंहः?

(पन्ना अङ्गुल्या शयानं चन्दनं सङ्केतयति)

(बनवीरःचन्दनस्य शय्यां निकषा गच्छति)

**बनवीरः** अहो! अत्र शयानोऽस्ति सर्पशावकः। अरे! मृत्योर्भयात् मुखमाच्छाद्य स्वपिति।चल त्वां महानिद्रायां स्वापयामि। महाकालाय त्वामर्पये। जयतु महाकाल! जयतु महाऽऽऽ...काऽऽऽ...ल!! (करवालेन प्रहरति)

**पन्ना** हाऽऽऽ... पुउउ...त्रऽऽऽ... (इति मूर्च्छति)

(नेपथ्ये गीतमिदं गीयते)

**प्रकीर्णकीर्तिसौरभाय लोकवन्दिताय वै**
**महार्घकार्यकारिणे निजार्थहोमकारिणे।**
**चितौडगौरवाय नन्दनाय चन्दनाय वै**
**अमन्दशब्दवन्दनं प्रसूनवर्षयाऽर्प्यते॥**

**अपूर्वदाननिर्मितं यशःशरीरमद्भुतम्**
**अनन्तकीर्तिरश्मिभिस्तवैव भासते भृशम्।**

असङ्ख्यकण्ठगुञ्जितो जयस्तवैव चन्दन
नतैर्विनम्रमस्तकैस्तवाहुतिः प्रणम्यते ॥

अजस्रक्तधारया त्वयैव सिञ्चिता धरा
शिरःप्रदानकर्मणा त्वयैव रक्षिता धरा।
नमोऽस्तु वीरमूर्तये नमो हुतात्मने नमः
नमोऽस्तु वीर्यवैभवाय सन्ततं नमो नमः ॥

(समाप्तम्)

*****

# ॥ शम्भुराजशौर्यम् ॥

**श्री प्रकाशः जानी**[1]

**पात्राणि**

| | | |
|---|---|---|
| १ | **कलशः** | राजशम्भुराजकविः |
| २ | **शम्भुराजमहाराजः** | मराठाप्रदेशराजा, महाराजशिवराजपुत्रः |
| ३ | **औरङ्गजेबाख्यः** | खलनायकः |
| ४ | **सैनिकद्वयम्** | कारावासबन्दीनिरीक्षकौ |

**सूत्रधारः**

**नीत्वा स्रजं स्वनिकषोत्कटश्रीनरेन्द्रं**
**'भूमीश! देहि प्रतिमाप्रमुखाय नो मे'।**
**श्रुत्वा'ऽऽदिशत् स' इति मौनमुखो महन्तः**
**कुर्याच्छुभं प्रमुखकेशवमोदिवृत्तम् ॥१॥**

(नेपथ्ये)

**सूत्रधारः**

**यथा वशिष्ठरामौ च कृष्णार्जुनौ पुराऽभवन्।**
**चाणक्यचन्द्रगुप्तौ च चन्दपृथ्वीनृपौ खलु ॥२॥**
**समर्थरामदासश्च शिवराज बभूवतुः।**
**शम्भुराजः सुतस्तस्य सुहृच्च कलशो कविः ॥३॥**
**तथैवाद्य नरेन्द्रस्य भूपतेः प्रमुखो गुरुः।**
**मूलं हि राजसत्तायाः धर्मः सर्वत्र दृश्यते ॥४॥**
**वागर्थौ रसभावौ च ह्यक्षरपुरुषोत्तमौ।**
**धर्मगुरोश्च राज्ञश्च तथैकताऽभिवर्तते ॥५॥**

---

१ बीएपीएस स्वामिनारायणसंस्कृतमहाविद्यालयः, सारंगपुर

**नटी** भोः भोः! शम्भुराजस्य तथा कलशकवेः किमैतिह्यम्?

**सूत्रधारः** अहो राष्ट्रभक्तिविवर्धिनीशिथिलगात्रोत्साह-सञ्चारिणीशौर्यगाथा न श्रुता? तर्हि कर्णयोः फलमेव न लब्धम्।

**नटी** अहो, श्रवणीयं श्राव्यताम्। श्रुतिद्वयं मउत्सहेते।

**सूत्रधारः** श्रूयतां तर्हि ..

(द्वौ निष्क्रान्तौ)

(ततः रङ्गमञ्चे दयनीयावस्थास्थौ राजा शम्भुराजः तथा कविभूषणः दृश्येते।)

**कलशः** हे राजन्! कथं सूर्योदयोऽद्य पश्चिमदिशि दृश्यते? मेरुर्वेपमानः, नभोऽपि धराशायी भाषते?

**शम्भुराजः** कविराज! किं विवक्षुः?

**कलशः** भवतः मुखे... दैन्यं, निर्वीर्यता?

**शम्भुराजः** मच्छरीरं खण्डीकृत्य प्रक्षिपेद् वा अग्निस्नानं कारयेद् वा कठिनतममृत्युं यच्छेद् अहं न दीनतां क्लैब्यं वा भजेय किन्तु..किन्तु मम कीर्तिकलशस्त्वं हे कलश! मत्कारणेन पीडितः..

अहो सदा देशगौरववर्धिनी तव अङ्गुलिः (स्पृष्ट्वा) कर्तिता.. (रोदनम्)

**कलशः** अहो!

**अपाम्पतेरगाधं ते नभसोऽपि सुविस्तृतम्।**
**कोऽपि महन्मनो ज्ञातुं न भूतो न भविष्यति ॥६ ॥**

स्वकायाय कुलिशादपि काठिन्यं पराय पुष्पाधिकमार्दवम्? धन्यस्ते राजन्!

न कवयः केवलकमनीयगिरः वा मात्रमनोरञ्जकाः किन्तु अवसरे प्राप्ते राष्ट्राय समर्पितधियः, स्वामिकीर्तिकामिनः एव, न शरीरशर्मस्पृहिणः। यथा कलश! त्वमसि।

**शम्भुराजः** त्वादृशा राष्ट्रकवयस्तु पुरष्कार्याः सम्मान्याः... किन्तु यत्कलशः शिरसि धार्यते, शोभां वर्धयते तद्दुर्जनपङ्किलपादगतोऽभवत्।

**कलशः** **सुखसमृद्धिकाले तु शत्रुरपि सखायते।**
**दुःखविपत्तिकाले तु सुहृदपि परायते॥७॥**
**गाढतमःपरिप्राप्ते कायाछायाऽपगच्छति।**
**तत्र प्रकाशकर्तारः मित्रं मित्रायते खलु॥८॥**

**शम्भुराजः** मम जीवनतमसि जगत् प्रकाशवान् मित्रोऽपि गतः परन्तु हे मित्र! तव कारणे अमावस्याऽपि ज्योत्स्नायते।(द्वौ आलिङ्गतः)

(तदा औरङ्गजेबाख्यखलनायकः तथा सैनिकद्वयमागच्छति।)

(दूरतो द्वौ सैनिकौ वार्तालापमग्नौ)

**एकः** अरे, अन्नं विना, जलं विना, सततनवत्रिंशद् दिनेभ्यः एतौ कथं जीवितौ?

**द्वितीयः** मानसिक-शारीरिक-अनेकयातनाः सहिताः तथापि..

**एकः** यथा अयं (अग्रगच्छन्तम् औरङ्गजेबाख्यं निर्दिश्य) महाक्रूरः तथैव शम्भुराजमहाशयः महाशूरः तथा तस्य कविरपि..।

**औरङ्गजेबाख्यः** (समीपतः गत्वा, चकितो भूत्वा) (आत्मगतम्) अहो... न जाने कथमेतौ जीवितौ? क्वचित् पर्वतः नमेत् किन्तु एतौ...

(प्रकाशम्) (सकटाक्षम्) अहो, शिवराजवीरपुत्र शम्भुराजन्! अखिलभुवन-उद्धारकः स्वयं बन्दी वर्तते। हा... हा... हा...

**कलशः** अरे! द्विसहस्त्रसैनिकाः केवलमेकराजानं बन्दीकर्तुं प्रेषिताः, तदेव चक्रवर्तिसम्राट् शम्भुराजबलं सूचयति। भवान् अपि महासम्राट् किन्तु कपटताकुटिलताक्रूरतानाम्। त्वादृशो खलनायको न भूतो न भविष्यति।

**औरङ्गजेबाख्यः** अपलापं मा कुरु। कविस्तु सच्चरित्रं गुम्फति।

**कलशः** अरे...! किं किं सच्चरितं त्वयाचरितं?
उष्ट्रोपरि अधोमुखीकृत्य एकराजानमनिन्दत्, मूत्राभिषेकः कारितः... अरे तुच्छ! यस्मै सिंहासनं देयं तस्मै कारावासः दत्तः। यथा समुद्रे अगाधजलं तथैव त्वयि अपारबलं, किन्तु अपकारकं निरर्थकम्...

**औरङ्गजेबाख्यः** मूको भव अन्यथा...

**कलशः** अरे, सच्चरितगुम्फनं न कर्तव्यम्!

**औरङ्गजेबाख्यः** अग्र उच्यमान एकोऽपि शब्दः तव जीह्वां दूरीकरिष्यति।

**शम्भुराजः** (अतिदीनतया) नहि नहि... मम जीह्वां कर्तयतु किन्तु कविजीह्वाकर्तनं महान् अनर्थः। तद् द्रष्टुमपि न शक्नोमि।

**कलशः** नहि नहि... प्रथमे प्रजा एव राजसुखाधिकारं भुङ्क्ते।

**औरङ्गजेबाख्यः** अहो! क्व प्रजावात्सल्यं क्व राजभक्तिर्वाम्। द्वयोरादरः कर्तव्यो खलु।
सैनिक! प्रथमं कविराजकलशस्य जीह्वां दूरीकुरु..ततः राज्ञः नयने अपहर, अनन्तरं पुनः कविम् अन्धमपि करोतु। अधिकसमर्थाय तावत्फलमपि देयम्..

**शम्भुराजः** एवं मा कुरु।

**औरङ्गजेबाख्यः** राजन् यदि कविकलशं रक्षयितुमिच्छति चेत् त्रीन् वरान् देहि-

१. स्वधर्मं परिवर्तय।
२. मराठा-राज्यं देहि।
३. यद्धनम्अपहृतं तत्पुनः देहि।

**कलशः** कदापि न, महामूर्खाग्रणिन्! अर्थं साधयामि वा देहं पातयामि।
नवत्रिंशद् दिन्नानि गतानि किन्तु देशभक्तिरस्मिता नैव गमिष्यति।

**औरङ्गजेबाख्यः** विचार्यतां राजन्! अन्तिमं दिनं यच्छामि।
सैनिकाः! (इङ्गितेन बोधयति।)

(द्वौ सैनिकौ जीह्वाकर्तनसाधनं तथा अति-ऊष्णतम-अङ्गार इव शूलिं गृहीत्वा आगच्छतः )

(करुणदृश्यम्)

**राजनेत्रं जगन्नेत्रं कविवाणी सरस्वती।**
**याभ्यां विना दिशाः सर्वाः नभो भूमिः ह्यपूर्णवत्॥९॥**
**जगद् अन्धं गिरः मौनं, प्रकृतिर्विकलायिता।**
**खद्योतवदभूत्सूर्यः सर्वत्र तमसो प्रभा॥१०॥**

(अन्ते मञ्चे औरङ्गजेबाख्यागमनम्)

**औरङ्गजेबाख्यः** नमो राजकविभ्याम्। (शम्भुराजोऽतिक्रुध्यति) अरे कविराज! किमपि काव्यं वद.. (हसति)

**शम्भुराजः** श्रूयतां.. अस्माकं निर्णयः अविचलः (गर्जित्वा) यतो हि निर्वातेऽपि गिरयो नैव कम्पन्ते।

**औरङ्गजेबाख्यः** (आत्मगतम्) अरे, एतत्तु कविकलशवाणी.. नहि नहि मम भ्रान्तिः। (प्रकाशम्) मूढतां माऽऽचर!

**शम्भुराजः** एषा दृढता वर्तते न तु मूढता। श्रृणु त्वं माम् एकसहस्रवारं मृत्युदण्डं यच्छेः तथाप्यहं मुहुर्मुहुर्भारतभूमिभक्त्यर्थं सेवार्थं जन्म धरेयम्।

**औरङ्गजेबाख्यः** (स्तब्धः सन्) धन्यवादस्ते देशभक्तये! मम चतुःषु पुत्रेषु एकोऽपि त्वादृशश्चेत् समग्रभारते अहं चक्रवर्ती भवेयम्। त्वं बन्दी सन्नपि चक्रवर्ती, कलशः अन्धः सन्नपि महाक्रान्तिदर्शी कविः किन्तु... (क्षणं स्थित्वा) सैनिकाः! एतच्छरीरं खण्डयित्वा भञ्जयित्वा नद्यां प्रक्षिपन्तु।

(औरङ्गजेबाख्यः पराजित इव प्रयाति,
द्वौ मृत्यु-आदेशं श्रुत्वाऽपि स्मेराननौ,
सर्वसैनिका अनिच्छन्नपि शूलि-मुद्गरादि गृहीत्वा आगताः)

किल-

**राष्ट्रभक्तिं विना सर्वं जीवनं मरणोपमम्।**
**मरणं राष्ट्रभक्त्यै स्यात् तन्मरणं हि जीवनम्॥११॥**
**कलशः शम्भुराजश्च मृत्वाऽपि ह्यमरायितौ।**
**तथैवाऽमरता लभ्या वा जीवनं स्मशानवत्॥१२॥**

*****

# ॥ सरस्वतीरहस्यम् ॥

भट्टः रुद्रः जयन्तभाई[१]

## पात्राणि

**(मङ्गलाचरणम्)**

**सच्चित्रस्थितिपूरकां नवकलानावीन्यरूपां सदा**
**सर्वोत्कृष्टकृपाब्धिमज्जननरां सौरभ्यदात्रीं सदा।**
**ब्रह्माब्रह्मविशारदां धवलवासस्विप्रकाशैः प्लुतां**
**वन्दे शान्तिसुशान्तकारिणीमहं वेदार्थतत्त्वार्थिनीम् ॥१ ॥**

**(नान्द्यन्ते ततः प्रविशति सूत्रधारः)**

**सूत्रधारः** अकारणकरुणासुलभां स्मरामि तावत् प्रकाशकारिणीं शारदाम्।

**नटः** भवतु। सम्प्रति विपुलां शारदाम् अनुलक्ष्य तद्रहस्यं विज्ञापनाय महात्मा वसिष्ठो मुनिमष्टावक्रमुपदिदेश।

**नटी** कोऽयमुपदेशस्तावत्?

**नटः**

**निगमनिखिलसारोऽनित्यनित्यैकभूतो**
**निकपमनवकल्पो नूतनो निष्ठनिष्ठः।**
**नवनवनययुक्तो नाकसद्दिव्यरूपां**
**निधिनिकरसमानोऽयं पवित्रोपदेशः ॥२ ॥**

जिज्ञासामि, सरहस्यसरस्वतीकोपदेशस्तावत् सर्वै-रवगमनीयोऽस्ति।

---

१ शास्त्रिकक्षीयच्छात्रः,श्रीनारायणसंस्कृतमहाविद्यालयः,पेटलाद, गुजरातम्

(इति निष्क्रान्तः)

(ततः प्रविशति महात्मा वसिष्ठः अष्टावक्रश्च)

**अष्टावक्रः** सप्रश्रयं प्रमाणाः मुनिभ्यः।

**वसिष्ठः** नमो वाग्भ्यः।

**अष्टावक्रः** सम्प्रति शारदां मातरं स्मरामः।

**शुक्लसुन्दररूपां तां कमलाब्जकदम्बिनीम्।**
**हंसारूढां च पद्माक्षीं वन्देमहि सुरप्रियाम्॥३॥**

**वसिष्ठः** नमश्शारदायै। भक्तिवेदान्ताभ्यामिदं रहस्यमस्ति। तदाध्यात्मिकब्रह्मसिद्धान्तरूपमहिममण्डितम्। तदेव रहस्यं सानुकूलतयाचष्टेऽहम्।

**अष्टावक्रः** शृणोमि तावत्।

**वसिष्ठः** सरस्वान्भगवान्ब्रह्मा भगवतीं सरस्वतीं ध्यात्वासुरसैन्य-नाशायात्मतपोबलञ्च वर्धनाय तन्महिमा गायति-

**व्यक्ताव्यक्तगिरः सर्वे वेदाद्या व्याहसन्ति याम्।**
**सर्वकामदुघा धेनुः सा मां पातु सरस्वती॥४॥**

ऋग्वेदा त्र्यक्षरा बाला रक्तवस्त्रा हंसासना प्रातःकालीनस्वरूपा सा गायत्रीरूपा भवति।

**अष्टावक्रः** ततस्ततः।

**वसिष्ठः** यजुर्वेदा त्रिलोचना युवती शुक्लवस्त्रा वृषारूढा रुद्ररूपिणी मध्यकालीनस्वरूपा सा सावित्रीरूपा भवति।

**अष्टावक्रः** ततस्ततः।

**वसिष्ठः** सामवेदा चतुर्भुजा वृद्धा पीतवस्त्रा गरुडारूढा कृष्णस्वरूपिणी सायंकालीनस्वरूपा सा सरस्वतीरूपा भवति।

**अष्टावक्रः** प्रातर्मध्याह्नसायंसन्ध्योपासनानित्यकर्मत्वात् करणीया।

**तपःसन्निष्ठवेदाध्यायार्थसंवाहकाः सदा।**
**अफलप्रेप्सवो नित्यं सन्ध्यां कुर्वन्ति तत्पराः ॥५॥**

**वसिष्ठः** सत्यं किल। सन्ध्या नित्यं कर्तव्या। भवतु। विषयान्तरं मा कुर्मः। प्रबला सुव्यक्तवाचा वाग्मिनी माता सरस्वती सर्वान् रक्षेत्। वेदार्थतत्त्वगूढक्लिष्टमनोहर-रूपकरूपयोग्यायाः शारदायाः गूढतत्त्वं प्रघनवन-रजनीसममस्ति।

**अष्टावक्रः** अपि तद्गूढतत्त्वं जाननीयं किल ?

**वसिष्ठः** आम्। कथयामि तावत्।

**अष्टावक्रः** श्रृणोमि, श्रृणोमि।

**वसिष्ठः** एकदा पम्पासरसि कृताञ्जलिर्मातङ्गमुनिः विचित्रसरसीरुहमेकं ददर्श। विभिन्नपल्लवभिन्नरङ्ग-भिन्नाकारयुतं पद्मं दृष्ट्वा स तं स्पर्शयितुमग्रेसरो जातः। तदैव तदन्तःस्थितदिव्यतेजः सकलप्रकाशवद्वस्तु तेजःसमं द्वितीयम् इव सूर्यसमं तेन दृष्टम्। मातङ्गमुनिरवदत्-

**किं ते हि रूपं किमिदं हि तेजः**
**किन्नामधर्तासि मृणालबन्धो!।**
**का शक्तिरस्तीति च ब्रूहि मह्यं**
**तत्पद्मरूपं ह्यवदच्चरित्रम् ॥६॥**

**पद्मः** प्रणामा अत्रभवद्भ्यः। शापोऽस्ति मे यद्विचित्रपद्मरूप्यहं सर्वानपि ये मां पश्यति तान्मे शापवार्तां कथञ्च शापः भूतः तत्कथनस्य।

**मुनिः** एवं खलु! ततस्ततः।

**पद्मः** भवद्भ्योऽपि कथयामि। शृणुत।

**मुनिः** शृणोमि।

**पद्मः** सकलसुलभवातानुकूलदिवसोऽयमासीत्। चित्रसारथि-नामा गन्धर्वोऽहं पुरन्दरसदस्यासम्। तत्र केनचिद्गन्धर्वेणोक्तम्-

**रविररमयदिन्द्रं स्वैर्मयूखैरसाध्यै-**
**र्नवनिधुवनरक्तं शान्तनक्तं श्लवत्तम्।**
**दिनमुदितमितीड्यं स्वं पतिं धैर्यमुत्त्वा**
**रतिरतहतभाग्योऽभूद्बलात्स्वप्नराजा॥७॥**

**मुनिः** हा कष्टमिन्द्रस्य। भवतु। अग्रे वद।

**पद्मः** तत्कारणमिन्द्रः क्रुद्धोऽऽसीत्। अत एवाप्सरसोऽपि दुर्लभदर्शनाः सञ्जाताः। अप्सरोद्रष्टुकामोऽन्वेषण-मारब्धवानहम्। तत्रैव सुदुर्लभप्रेक्षणायाः शय्याः प्रकोष्ठोऽऽगतः।

**मुनिः** ततस्ततः।

**पद्मः** (सलज्जम्) अप्रयोजनेनैव दैववशाद् अन्तोगत्वा शचीकृतपूजनं दृष्टम्।

**मुनिः** को देवोऽयं महाभागी वर्तते यच्छची तत्पूजनं तत्सपर्यां करोति?

**पद्मः** (विहस्य) न तत्र कोऽपि देवविशेषः। सा त्वस्माकं भगवती सरस्वती। वसन्तपञ्चमीविशेषदिवसोऽय-मासीत्। तदनुलक्ष्यैव शची देवी मातरं सरस्वतीं पूजितवती आसीत्।

**मुनिः** (प्रणामं विनिवेद्य) जयतु सरस्वती देवी।

**पद्मः** तत्राकस्मादेव मां दृष्ट्वा कोपितवती सेन्द्राणी अधःपतितं पद्मं नीत्वा मत्प्रति क्षिप्य साक्षाच्छापं दत्तवती।

**तच्छापरूपं कमलं प्रभूत्वा**
**वैचित्र्यवत् तेज अपारवच्च।**
**यत्क्वापि सङ्गत्य वदात्मशापा-**
**ज्जातां हि वार्तां शतवारमव्यात् ॥८॥**

**मुनिः** अहो रूपम्! कष्टायते भवान्तु।

**पद्मः** दत्तशापा मां सरस्वतीपूजनभङ्गक्रुद्धसरस्वतीतत्त्वाज्ञं ताम्प्रति मच्छ्रद्धामुदयनाय सरस्वतीरहस्यमुपदिष्टवती।

**इन्द्राणी** (अशेषं कृत्वा) वीणापुस्तकधारिणी शारदां वयं जानीमहे किन्तु विद्याप्रदात्र्याः मातुः सरस्वत्याः गूढतत्त्वं ज्ञानाय योग्यजनोऽऽवश्यकोऽस्ति। भवन्तं कमलस्वरूपं दृष्ट्वैव कथयाम्यूहतत्त्वम्।

**शचीशापी** धन्योऽहमधुना। (सास्रम्) हे मातः! हे शारदे! त्वामहे शरणागतोऽस्मि।

**इन्द्राणी** (पूजां परिसमाप्य) (सहर्षम्) अहो मातृस्वरूपम्! सकलस्थावरजङ्गमस्वरूपवस्त्ववस्तुत्वरूपकवचा-वृत्तसुदुर्लभमिदं सरस्वतीतत्त्वमस्ति।

**शचीशापी** तत्स्वरूपं किम्? केयम्?

**इन्द्राणी** सनातनधर्मशास्त्रे सरस्वत्याः द्वे स्वरूपे प्राप्येते। एका ब्रह्मापत्नी सरस्वती अपरा ब्रह्मात्मजाच्युतपत्नी वा।

**शचीशापी** का ब्रह्मापत्नी। का च ब्रह्मात्मजा? तज्जिज्ञासा वर्तते।

**इन्द्राणी** ब्रह्मापत्नी सरस्वती मूलप्रकृतिजातसत्त्वगुणमहाशक्तिः तथा प्रमुखत्रिदेवीष्वेका। अपरा विष्णुपत्नीस्वरूपा

सरस्वती ब्रह्मणो जिह्वोत्पन्ना ब्रह्मापुत्री मन्यते। शास्त्रेषु सा मुरारिवल्लभेति नाम्नापि प्रसिद्धा वर्तते।

**शचीशापी** तयोर्मध्ये कोऽपि भेदो येन तत्पृथक्त्वं ज्ञायते?

**इन्द्राणी** धर्मशास्त्रानुसारं द्वेऽपि देव्यौ समाननामस्वरूप-प्रकृतिशक्तिब्रह्मज्ञानविद्याद्यधिष्ठात्र्यौ वर्तेते। अतः तन्मध्ये न भेदः।

**शचीशापी** ततस्ततः।

**इन्द्राणी** ब्रह्मविद्यानृत्यसङ्गीतक्षेत्रयोरधिष्ठातृरूपेण नटराजशिवं सरस्वतीं च मन्यन्ते भक्ताः। अतः सरस्वत्या अपरं नामापि **"शिवानुजा"** अस्ति।

**शचीशापी** शिवानुजायै प्रणतिः।

**इन्द्राणी** क्वचिच्च ब्रह्माणीं ब्रह्मपत्नीं विहायापराप्येका सरस्वती प्राप्यते। अतस्तु तिस्रः सरस्वत्यः सन्तीति शास्त्रोद्गतम्।

**सा ब्रह्मातनया कुत्र कुत्र पत्नी हि ब्रह्मणः।**
**तद्भिन्नाप्यमि तिस्रः स्यात्सरस्वत्याः स्वरूपकाः ॥९॥**

**शचीशापी** प्रबुद्धायाः मातुरपराणि कान्यपि नामानि सन्ति वा?

**इन्द्राणी** आम्, वाणी-शारदा-वागीश्वरी-वेदमातृस्वरूपाणि नामानि तस्याः।

**शचीशापी** प्रमुखस्वरूपं किं तस्याः?

**इन्द्राणी** सा शुक्लवर्णयुतशुक्लाम्बरवीणापुस्तकधारिश्वेत-पद्मासना। तदुपासनाफलमपि वर्तते।

**शचीशापी** (सकौतुकम्) किं किम्? क्षिप्रं कथय।

**इन्द्राणी** (सधैर्यम्) महाविद्योपासनया मूर्खोऽपि पण्डितं भवितुमर्हति। अतस्तु- अज्ञानिनां कृते वीणाधात्री विशेषरूपेणोपासनीया पूजनीया स्तुत्या चास्ति।

**शचीशापी** कदानुकूला वयं सरस्वतीसपर्यां कुर्युरिति सन्देहः।

**इन्द्राणी** (सरस्वतीमूर्तिं दर्शयन्) अद्यैव किल। वसन्तशुभ-पञ्चमीतिथौ सरस्वतीमहापूजनस्य कथनम्। तत्परिपाटी वर्तते।

**शचीशापी** भवतु। किन्तु तद्वर्णनं क्व प्राप्यते तत्खलु ब्रूहि।

**इन्द्राणी** देव्याः सरस्वत्याः वर्णनं वेदेषु मेधासूक्तेषु, उपनिषत्सु, रामायणमहाकाव्ये, महाभारते च प्राप्यते। तदतिरिक्तशास्त्रेष्वपि तथा कालिकापुराणे, बृहन्नन्दीकेश्वरपुराणे तथा शिवमहापुराणे, श्रीमद्देवीभागवतपुराणे च प्राप्यते। अपरं ब्रह्मवैवर्तपुराणे विष्णुपत्नीरूपेण सरस्वत्या विशेषोल्लेखोऽस्ति।

**शचीशापी** एवम्। किन्तु तत्प्रादुर्भावः केनाभवत्?

**इन्द्राणी** कथयामि। (उपविश्य) पौराणिककथानुसारं सृष्टिप्रारम्भिककाले पितामहो ब्रह्मा स्वसङ्कल्पेन ब्रह्माण्डस्य तदन्तःस्थितानां सर्वप्रकाराणां स्थावर-जङ्गमानां यथा वृक्षाः पतत्रिणः मनुष्यादिसर्वेषां योनिरचनां कृतवान्।

**शचीशापी** तेन किम्?

**इन्द्राणी** (विहस्य) धैर्यमवलम्बय। सर्वं कथयामि।

**शचीशापी** क्षम्यताम्।

**इन्द्राणी** अस्तु। जीवसर्जनीब्रह्मा तत्कृत्वापि न सन्तुष्टः। तद्विचारेषु किमप्यवशिष्टं येन परितोऽस्माकं मौनायते।

**वसिष्ठः** कोऽस्ति?

(सप्तमुनयः प्रविश्य प्रणम्य च)

**मुनयः** अभिवादनं मुनिभ्यः।

**वसिष्ठः** नमो वाग्भ्यः। प्रविशन्तु। भवन्तोऽपि कथां श्रृण्वन्तु।

**मुनयः** महाभागिनो वयम्।

(इत्युपविशन्ति)

(वसिष्ठमुनिः कथामग्रे कृत्वा)

**शचीशापी** विश्वसर्जनोऽपि कमलजन्मा कथं सन्तुष्टहीनः?

**इन्द्राणी** अवशिष्टरचनामकृत्वा हिरण्यनाभिरसन्तुष्टः। तदैव तत्समस्यानिवारणाय निजकमण्डलुतो जलाञ्जलिं कृत्वा तत्सङ्कल्प्य जलमोचनं कृत्वा रमानाथस्तुतिं कृतवान्।

**मेघश्यामं पीतकौशेयवासं**
**श्रीवत्साङ्कं कौस्तुभोत्भासिताङ्गम्।**
**पुण्योपेतं पुण्डरीकायताक्षं**
**विष्णुं वन्दे सर्वलोकैकनाथम् ॥१० ॥**

**शचीशापी** विष्णुं वन्दे सर्वलोकैकनाथम्। ततस्ततः।

**इन्द्राणी** श्रुतब्रह्मस्तुतिर्भगवान् कमलेक्षणः तत्रोपस्थितः सन् तदङ्गसमस्यानिवारणायादिशक्तिमातुराह्वाहनं कृतम्। तेनादिशक्तिर्मूलप्रकृतिरूपोपस्थिता तेजःपुञ्जमया। तदैव विष्णुब्रह्माणौ सङ्कटं दूरीकर्तुं तां निवेदितवन्तौ।

**शचीशापी** समस्याः किल सर्वैर्भुञ्जनीयाः।

**इन्द्राणी** सहसैव निजमूलप्रकृत्यात्मकस्वरूपात् स्वांशतः श्वेतवर्णात्मकप्रचण्डतेजस्तत्र उत्पन्नः कारितवती। तन्नारीरूपा सादिशक्तिर्भूतवती।

**शचीशापी** सा नारीरूपादिशक्तिः कीदृशी?

**इन्द्राणी** सा वीणापुस्तककरा, वरमुद्रा तथा धवलकमल-विराजिता। प्रकटीभूय सहसैव तया वीणामधुरनादः

कृतः। तेनैव मधुरमनोहरनादेन समस्तप्रशस्तसंसारो वाणीमयो जातः। जलधारा मध्ये कीलाटलप्राप्तिर्भूता।

**शचीशापी** अलौकिकाभूतपूर्वादृष्टपूर्वमिदं देव्याः गूढतत्त्वस्वरूपमस्ति। येनासंसारो वाङ्मयो जातः।

**इन्द्राणी** तद्वाङ्मयी शक्तिः वायुमपि विश्लेषितवती। तदा कृत्स्नविश्वं शब्दरागप्रदात्रीं देवाः तां ब्रह्मज्ञानवाणी-सङ्गीताधिष्ठात्रीरूपेण सरस्वतीति नाम्नाभिधत्तवन्तः। तत्कारणमद्याप्यतुल्यस्वरविलासिनी भगवती सरस्वती महाविद्या वर्तते।

**शचीशापी** (सानन्दम्) जयतु सरस्वती देवी। जयतु सरस्वती देवी।

**इन्द्राणी** अन्यदपि श्रृणु। तदैव मूलप्रकृतिरादिशक्तिः ब्रह्माणमुक्तवती यत्सैव भवदर्धाङ्गिनीरूपेण प्राप्नुयादिति। यथा विष्णुशक्तिः श्रीरस्ति। शिवशक्तिः शिवास्ति। तद्वदेव ब्रह्मशक्तिः सरस्वती। तदुद्घोषणां कृत्वान्तर्हिता सादिशक्तिः।

**शचीशापी** मन्ये तावत्तदनु भगवती सरस्वती सृष्टिसंलग्ना जाता।

**इन्द्राणी** आम्। अधुना तद्गूढवर्णनं ज्ञापयामि। सावहितं श्रृणु।

**शचीशापी** श्रृणोमि तावत्।

**इन्द्राणी** सरस्वतीं साहित्यसङ्गीतकलादेवीरूपेण मन्वते जनाः। तत्र विचारणाभावनासंवेदनारूपेण त्रिविधसमन्वयो वर्तते।

**शचीशापी** तत्कथम्?

**इन्द्राणी** वीणा सङ्गीतस्य, पुस्तकं विचारणायाः तथा हंसवाहनं कलाया अभिव्यक्तमस्ति। लोकचर्चाविषये सरस्वती शिक्षादेवी वर्तते।

**शचीशापी**

**अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।**
**व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥११॥**

**इन्द्राणी** सत्यमुदितं त्वया। सरस्वती तु ज्ञानकोशोऽस्ति ज्ञानेन हीना मनुष्याः पशुसमाः। पशुं मनुष्यत्वं भवितुम् अन्धं नेत्रयुक्तं भवितुं यच्छ्रेयस्तत्तु शिक्षैवास्ति।

**शचीशापी** सारल्येन ज्ञापयताम्।

**इन्द्राणी** मननान्मनुष्यो भवति। मननं बुद्धेर्विषयोऽस्ति। भौतिकप्रगतिश्रेयो बुद्धिवर्चसं देयमेव सरस्वत्यनुग्रहोऽस्ति। तदतिरिच्योपलब्धिं विना तु मनुष्यो नरवानरायते।

**शचीशापी** सरस्वत्यर्चना कदा कार्या?

**इन्द्राणी** शिक्षायाः गरिमा बौद्धिकविकासस्यावश्यकता च प्रतिजनमवगमयितुं सरस्वतीसपर्या कर्तव्या। प्रकारान्तरेण गायत्रीमहाशक्त्यन्तर्गतत्वेन बुद्धिपक्षस्याराधना कर्तव्येति।

**शचीशापी** तद्बाह्यस्वरूपं जिज्ञासामि।

**इन्द्राणी** श्रृणु। सरस्वत्येकमुखा तथा चतुर्हस्ता वर्तते। मुखोल्लासयुतं हस्तद्वये वीणाभावसञ्चारः तथा कलात्मकतायाः प्रतीकोऽस्ति। पुस्तकेन ज्ञानस्य तथा स्रजा त्वीशनिष्ठा सात्त्विकतायाश्च बोधं कारयति।

**शचीशापी** हंसारूढां सरस्वतीं पश्यामि तावन्मूर्तिमिमम्।

**इन्द्राणी** आम्। सरस्वतीवाहनं राजहंसोऽस्ति। स मधुरस्वरस्य सौन्दर्यस्य च प्रतीकः।

**शचीशापी**

**शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं**
**वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।**
**हस्ते स्फाटिकमालिकं विदधतीं पद्मासने संस्थितां**
**वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥१२॥**

**इन्द्राणी** नमामि सरस्वतीं बुद्धिप्रदाम्।

**शचीशापी** तत्पूजनायान्तरफलं वर्तते किम्?

**इन्द्राणी** अस्ति। ये मन्दबुद्धिजनास्सन्ति तेभ्यो गायत्रीमहाशक्तिसरस्वतीतत्त्वम् अधिकहितकरं सिद्ध्यति। बौद्धिकक्षमतां विकासयितुं तथा चित्तचञ्चलतावस्थतां दूरीकर्तुं विशेषरूपेण सरस्वती पूजनीया।

**शचीशापी** ततस्ततः।

**इन्द्राणी** मस्तिष्कतन्त्रसम्बन्धितानिद्राशिरस्पीडादिरोगोपचाराय गायत्र्यंशसरस्वत्याः साधना लाभदायिनी भवति। कल्पनाशक्तिन्यूनता, समयोचितनिर्णयासामर्थ्यता, विस्मृतिः, प्रमादो, दीर्घसूत्रतादिकारणेभ्योऽपि रक्षणाय महाविद्योपासना विशेषरूपेण कर्तव्यास्ति। तदाध्यात्मिकोपचारः प्रकर्तव्यो वर्तते।

**शचीशापी**

**नीहारहारघनसारसुधाकराभ्यां**
**कल्याणदां कनकचम्पकदामभूषाम्।**
**उत्तुङ्गपीनकुचकम्भमनोहराङ्गीं**
**वाणीं नमामि मनसा वचसा विभूत्यै॥१३॥**

(ततः प्रविशति देवराजेन्द्रः)

**इन्द्रः** हे पद्मे! किं प्रचलति?

**इन्द्राणी** मच्छापपध्माय सरस्वतीरहस्यं श्रावयामि।

**इन्द्रः** नावगच्छामि। सविस्तरं श्रावय।

**पद्मः** एवमेव शची समस्तशापवार्तां श्रावितवती। इन्द्रोऽपि शापार्द्धं कृतवान्यथा दशमवारमेव शापमुक्ति-र्भविष्यतीति। एवं भवन्तो दशमः...।

(इत्यर्द्धोक्तिं कृत्वैव शापमुक्तः चित्रसारथिः भूत्वा)

**मुनिः** धन्योऽयं ते जीवनकालः। मदुपदिष्टं सरस्वतीरहस्यं भवते श्रेयस्करं भूयात्।

**चित्रसारथिः** प्रणामाः गुरुभ्यः।

(इत्यन्तर्हितः चित्रसारथिः)

**अष्टावक्रः** धन्योऽयं चित्रसारथिनामा गन्धर्वः। प्रणामास्सूर्याय। प्रणामाः सर्वेभ्योऽपि।

**वसिष्ठः** एवमस्ति सरस्वतीरहस्यम्। जयतु भगवती सरस्वती।

**अष्टावक्रः** जयतु भगवती सरस्वती।

(सर्वे निष्क्रान्ताः)

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥१४॥**

*****

# सम्पादकपरिचयः



## डॉ. जिगरः म. भट्टः

शास्त्री, साहित्याचार्यः, विद्यावारिधिः

- श्रीसोमनाथसंस्कृतविश्वविद्यालये (वेरावलम्, गुजरातम्) अनुस्नातक-साहित्यविभागे सहायकाचार्यः।
- अध्यापनक्षेत्रे ४ वर्षाणाम् अनुभवः।
- प्राचीनपरम्परां वहन् आधुनिकः कविः।
- विविधपरिसंवादेषु शोधपत्रप्रस्तुतिः, शोधलेखप्रकाशनानि च।
- गुजरातराज्यपाठ्यपुस्तकमण्डलस्य पाठ्यक्रमसमितीनां सदस्यः, पाठ्यपुस्तकानां समीक्षकः लेखकश्च।
- ग्रन्थाः –

१. संस्कृतवाङ्मये नगररचना
२. संस्कृतसाहित्ये वागर्थविचारः
३. रघुवंशम्–द्वितीयः सर्गः
४. शिवमहिम्नःस्तोत्रम् (विद्वत्प्रिया)
५. कुमारसम्भवम्-प्रथमः सर्गः (विद्वत्प्रिया)
६. महेशमहिम्नःशतकम् (स्वरचितं शतकम्)
७. स्वतन्त्रतासमर्चनम् (स्वतन्त्रतायाः अमृतमहोत्सवम् उपलक्ष्य आयोजितायां राष्ट्रिय-देशभक्ति-काव्यरचना-स्पर्धायां प्राप्तकाव्यानां सङ्ग्रहः)
८. शिशुपालवधमहाकाव्यम्-द्वितीयः सर्गः (विद्वत्प्रिया)
९. काव्यालङ्कारकारिका, अभिराजयशोभूषणम्, अभिनवकाव्यालङ्कारसूत्रम्-इत्येतेषां तुलनात्मकमध्ययनम्
१०. नाट्यसप्तर्षिकम् (२०२३ वर्षे समायोजितायां राष्ट्रिय-संस्कृत-एकाङ्किरचना-स्पर्धायां प्राप्त-एकाङ्किनाट्यानां सङ्ग्रहः)